
कविकुलगुरु - कालिदास - संस्कृत - विश्वविद्यालयः

कविकुलगुरु कालिदास संस्कृत विश्वविद्यालय, रामटेक

हस्तलिखित संग्रह

दाखल क्र. M 2272 विषय अद्वैतवेदान्त

नाव शारिरक भाष्य (ब्रह्मसूत्रावरील) mss

लेखक / लिपीकार शंकराचार्य

पृष्ठ 59 काळ — पूर्ण / अपूर्ण

संबंधतयास्वावच्छेदकीभूततादृशसंबंधेनसाधनवतः प्रतियोग्यनधिकरणत्वाभावात् प्रतियोगितावच्छेदकीभूतसं
बंधेनप्रतियोग्यनधिकरणत्वोक्त्यातद्धारणोत्तु संयोगेनवह्निसाधकेधूमादावव्याप्तिः समवायावच्छिन्नवह्न्यभाव
स्यैव समवायेन प्रतियोगिव्यधिकरणस्य वह्नित्वस्वरूपं यत्प्रतियोगित्वं तस्यैव संयोगसंबंधेनावच्छिन्नत्वादिति चेद
त्रवदंति प्रतियोगितारूपमवच्छेदकस्वरूपं नायत्प्रतियोगित्वं तदपि कस्यचिदभावस्य केनचिदेकधर्मेण संबंधेनचाव
च्छिन्नं व्यवहारबलात् तत्सर्वेण संबंधेनवा समवायावच्छिन्नवह्न्यभावप्रतियोगित्वं संयोगावच्छिन्नमित्यादिव्यवहा
राभावात् तथाच यदभावीययत्प्रतियोगितावच्छेदकसंबंधेन तदभावीयतत्प्रतियोगितानिरूपितावच्छेदकीभूत
धर्मावच्छिन्नसंबंधित्वं हेतुमतस्तदभावीयप्रतियोगितानिरूपितावच्छेदकशून्यत्वं साध्यतावच्छेदके विवक्षितमि
त्यदोषः यच्चु प्रतियोगितेत्यपहाय यादृशप्रतियोगितेत्यभिधानादेव तादृशार्थलाभे भयवान् वह्नेरित्यादावति
व्याप्त्यापत्ते हेतुर्मीत्रस्यैव वह्निधूमत्वोभयावच्छिन्नाभावप्रतियोगिमत्वादित्यस्मद्गुरुचरणाः ॥ ग्राह्यसामानाधि
करण्यं च तद्वृत्ति साध्यसामानाधिकरण्यं तु स्व यथः संबंधविशेषेणैव साध्यसामानाधिकरण्यज्ञानादनुमितिस्तत्त्वं प्रति
बंधकत्वेनैव विरोधस्य हेत्वाभासत्वादितिमते नेदं यत्किंतु येनकेनापि संबंधेन साध्यसाधनयोः सामानाधिकरण्यादा
नुमितिः स्वव्यापकसाध्यसंबंधितामात्रं व्यापकत्वेन साध्यसाधनयोः संबंधाविशेषप्रवेशानदेवातिप्रसंग

त्तसमवायादिसंबंधेनवह्नित्वादेः साध्यतावच्छेदकत्वं तत्र तादृशसंबंधावच्छिन्नस्य प्रतियोग्यधिकरणाहेतुमन्निष्ठा
भावप्रतियोगितावच्छेदकत्वस्याप्रसिद्धावपि न क्षतिरिति ध्येयं । अत्र यादृशप्रतियोगितावच्छेदकधर्मस्तादृशप्रतियो
गिताधिकरणीभूतयद्यद्व्यक्तिनिष्ठाधिकरणतानवच्छेदकत्वस्याधिकरणतावच्छेदकत्वस्य च बहुधा व्यतिरेकस्तद्व्य न
क्तिभेदकूटवत्त्वमेव यादृशप्रतियोगितावच्छेदकावच्छिन्नानधिकरणत्वमित्यर्थो द्रष्टव्यस्तेन धूमवन्वह्न्यादिप्रतीतिरवश्प
ह्न्नातिः पर्वतत्वादितत्तद्धर्मविशिष्टधूमत्वावच्छिन्नाधिकरणातिरिक्तेवाप्यपत्तौ सत्वात् अयमुक्तधर्माधिकरणावच्छिन्नायामा
नाभावात् धूमादिसामान्याभावप्रतियोगितावच्छेदकं यद्धूमत्वादिकं तदवच्छिन्नाधिकरणत्वाप्रसिद्धावपि धूमवान् वह्ने
रित्यादौ नातिव्याप्तिः धूमाधिकरणतत्तद्व्यक्तिभेदमादायैव धूमसामान्याभावस्य प्रतियोगितावच्छेदकावच्छिन्नत्वेऽप्यधिकर
णप्रसंभवादिति ध्येयं ॥ नन्वेवं प्रतियोगित्वं नातिरिक्तपदार्थः प्रतियोगित्वादिकं तु स्वरूपसंबंध इत्याद्युत्तरग्रन्थवि
रोधात् किंतु स्वरूपविशेषः स च यदि प्रतियोगिरूपस्तदा वह्निमान् धूमादित्यादौ सर्वत्रासंभवः घटादिस्वरूपस्य पट
घाभावप्रतियोगित्वस्य समवेतत्वेन घटत्वाद्यवच्छिन्नतया तादृशावच्छेदकीभूतज्ञेयत्वाद्यवच्छिन्नस्य हेतुमति सत्वात् प्र
तियोगिव्यधिकरणाभावाप्रसिद्धेः न च प्रतियोगितावच्छेदकस्वरूपमेव प्रतियोगिता इत्यदोषः समवायेन वह्नेः साध्यते
व धूमादावतिप्रसंगात् समवायावच्छिन्नवह्न्यभावस्य वह्नित्वरूपं यत्प्रतियोगित्वं समवायवत्संयोगस्यापि तदवच्छेदक

धसंबंधसामान्येन यादृशप्रतियोगितावच्छेदकावच्छिन्नानधिकरणत्वं वक्तव्यं तथा च प्रतियोगितावच्छेदककाल
लिकसंबंधावच्छिन्नधूमाभावनिष्ठप्रतियोगितावच्छेदककालिकसंबंधेनायोगोलके धूमस्य वर्त्तमानतया धूमा
भावप्रतियोगिवैयधिकरण्यानुपपत्तेरतः स्वप्रतियोगितावच्छेदकयत्किंचित्संबंधेनैव वक्तव्यं तथा च प्रति-
योगितावच्छेदकमहानसीयसंयोगरूपयत्किंचित्संबंधेन प्रतियोगिव्याधिकरणः त्वादृशवह्निमान् धूमादित्या
दौ व्याप्तिः यादृशे त्यादिकं धूमस्य च संबंधांशे अयुक्तत्वादत आह यद्वेति वदंति । यत्तु प्रतियोगितावच्छेदक
संबंधेनैव यद्यधिकरणं प्रवेश्यं पुनः प्रतियोगितायाः साध्यतावच्छेदकसंबंधावच्छिन्नत्वविवक्षायां गौरवमतः
यद्वेत्यादिकल्पः इति तन्न इदं संबंधावच्छिन्नत्वतदनंतप्रतियोगितावच्छेदकभेदकूटघटितत्वेन यद्वेत्यादिकल्प
स्यैव गुरुत्वादित्याहुः संबंधभेदेन साध्यतावच्छेदकसंबंधभेदेन ननु संबंधविशेषेण साध्यसाधनयोः साध्य
सामानाधिकरण्यनिविष्टहेत्वधिकरणस्य परिग्रहः प्रयोजनमाह तथा चेति धर्मिणोपीति तादात्म्येन व्याप्य-
त्वं व्यापकत्वं च निर्वहतीत्यर्थः अन्यथा तादात्म्येन हेतोः साध्यस्य चाधिकरणाप्रसिद्ध्या न तत्त्वनिर्वाहादि
ति भावः योऽन्योन्याभाववृत्तियोऽभावत्वस्यैव वक्तुमुचितं अन्योन्याभावत्वनिवेशे वैयर्थ्यादिति ध्येयं । तद

भेगादिति विभाव्यते तत्तदा परामर्शेन साधनस्यानुमित्याच साध्यस्य ग्राह्ये यत्पक्षतावच्छेदकधर्मेशासार्द्धं सामानाधिकर
ण्यं तत्प्रविष्टो यादृशसंबंधेइत्यर्थो वोध्यः धूमवान्वह्नेरित्यादौ महानसीयसंयोगेनसद्धेतौसंयोगमात्रेणाहेतुमत्ता मा
द्रायात्तिव्याप्तिः परं द्रव्यत्वसाध्यक साध्यके घटानुयोगिकसमवायेनसत्त्वादिहेतौ समवायमात्रेणातत्वमादयो पी
त्यत्तो यः संबंधइत्यपहाय यादृश संबंधः संबंधइत्युक्तं साध्यस्य चेति ग्राह्यं सामानाधिकरण्यप्रविष्टइत्यन्वयः धू
माधिकरणेतत्तत्संयोगेनवह्निसामान्याभावसत्वाद्वह्निमान्धूमादित्यादावव्याप्तिरतोऽत्रापि यादृशइत्युक्तं तेन
संबंधेन यो हेतुमान् निरूपस्य फलमाधूमसमवायीति प्रतियोगितायाइति अवच्छेदकत्वेपि वह्नित्वस्यानतिरिक्त
न्वयः धनी चैत्रत्वादित्यादौ वृत्तिनियामकस्वामित्वादिसंबंधेन तादात्म्येन गवादेः साध्यत्वे सास्नादौ अव्या
प्तिः तत्र साधनवन्निष्ठान्योन्याभावप्रतियोगितायाः साध्यताघटकतादात्म्यसंबंधावच्छिन्नत्वेमानाभावस्य स्व
यमेव वोद्धाधिकारादिप्रकरणादुक्तत्वादेवं धनी चैत्रत्वादित्यादौ वृत्त्यनियामकस्वामित्वादिसंबंधेन साध्यताय
मपि तादृशसंबंधावच्छिन्नप्रतियोगित्वाप्रसिद्धेरतआह यद्वेति अपरे तु ननु प्रतियोगितावच्छेदकयावत्सं
वंधेन यादृश प्रतियोगितावच्छेदकसंबंध सामान्यावच्छिन्नानधिकरणत्वं वक्तुं न शक्यते धूमाभावस्य विशि
ष्टाभाववनिष्ठस्वप्रतियोगितावच्छेदकावच्छिन्नाधिकरणप्रसिद्ध्यातिव्याप्तेः न च स्वप्रतियोगितावच्छेदकसंव

साधर्मिणो धर्मव्याप्यत्वे तत्त्वस्य आह मा तु इत्थमेव चेति धर्मिणो धर्मव्यापकत्वे युक्तिमप्याह अत एवेति
धर्मिणो धर्मव्यापकत्वादेव । ननु अयं गौरित्यनुमितिर्गवेतरावृत्तित्वरूपायाः शुद्धगोत्वनिरूपितव्या
प्तेः ज्ञानान्निरवच्छिन्नगोत्वसाध्यकेव समवायेन भाविष्यति साध्यवदन्यावृत्तित्वरूपाया अपि व्याप्तेरनुमि
तिहेतुत्वस्याग्रेवाच्यत्वात् तादृशानुमित्यनुरोधाद्धर्मिणो व्यापकत्वस्वीकारोऽनुचित इत्युक्तं गोत्व
त्वे सति गोत्वत्वं गवेतरावृत्तित्वं तथा च गवेतरावृत्तित्वरूपाया गोत्वत्वव्याप्तेर्ज्ञानादृशायामुत्पन्नाया
अयं गौरित्यनुमितेर्गोत्वविधेयकत्वासंभवाद्गोविधेयकत्वमेवेति तदनुरोधादवश्यं धर्मिणो व्यापकत्वं
वाच्यमिति वाच्यं भावः ननु गोः साध्यत्वे गोत्वं हेतुमन्निष्ठाभावप्रतियोगितानवच्छेदकमित्याकारकधि
योऽनुमितिहेतुत्वात्तत्र च धर्मितावच्छेदकविधेयेव गोत्वत्वग्रहस्यापेक्षितत्वात् तद्ग्रहे गोविधेयकानुमि
तिरप्यनुपपन्नेत्यत आह आदीति आदिना पक्षधर्मतासंग्रहः तथा च गवेतरावृत्तित्वव्याप्तेः स्वव्यापक
ताग्रहे धर्मितावच्छेदकतयोपस्थितिध्रौव्येऽपि तद्विशिष्टस्य यत्र न पक्षधर्मताधीस्तत्रैवायं गौरित्यनुमितेर्गो
विधेयकत्वमावश्यकमिति तदनुरोधेनैव तादात्म्येन व्यापकत्वं वाच्यमित्याशयः यत्तु शुद्धगोत्वावच्छिन्नवि

वच्छेदकवह्निमत्त्वेति वह्निमत्त्वं वह्न्यधिकरणत्वं तच्चाधिकरणव्यक्तीनां भेदेप्यभिन्नमेवेत्याशयेनेदं अत्र साध्य
साधनयोरखितदीयसंबंधयोरपि भेदेन व्याप्तिर्भेदात्तादात्म्येन हेतुसाध्यस्थले हेतुतिप्त्वाभावप्रतियोगिसा
ध्यतादात्म्यमेव व्याप्तिर्वक्तुमुचितात्वा घटादिति निबद्धेति। नन्वेतादात्म्येन धर्मिणो धर्मव्याप्यत्तायामप
सिद्धांत इत्यत आह। तएवेति धर्मिणो धर्मव्याप्यत्वादेवेत्यर्थः तत्र तत्र व्यतिरेक्यादि ग्रंथे। ननु समवायेन
जलत्वादेः पृथिवीत्वाभावव्याप्यत्वपरत्तयैव तद्ग्रहे संगतिरित्याशंक्यत्तथ्यासति पृथिव्यां जलत्वादिभेद
साधनार्थं तदुपन्यासो न स्याद्व्यापकाभावेन व्याप्यत्ताघटकसंबंधेनावच्छिन्नव्याप्याभावस्यैव सिद्धे
रित्यन्वयि निदृष्टांत पूर्वं परिहरति यथा चेति धूमाभावयद्वृत्तिवह्निधीरित्यन्वयः महानसे संयोगे
न न निवर्त्तित इत्यन्वयः संयोगावच्छिन्नस्याभावानुमितौ भासत इत्यर्थः निवर्त्तते चेति धूम इति पूर्वे
णान्वयः तादात्म्येनैवेति समवायेन व्याप्यतायां तु समवायेन जलत्वस्यात्यंताभाव एव सिद्ध्यादिति ज
लभेदसाधनार्थं तदुपन्यासो न स्यादिति भावः नन्वेतावतापि तादात्म्यसंबंधजलत्वाभावः सिद्धानतु ज
लान्योन्याभाव इति तद्दोषतादवस्थ्यं अत आह स एव चेति धर्मिणो धर्मव्याप्यत्वे प्राचां संवादमुपन्य

साध्यतावच्छेदकसंबंधेनेतित्तथाचसंबंधावच्छिन्नघटाद्यभावमादायैवलक्षणासमन्वयइतिभावः द्रव्यत्वस्यगगनासंयु
क्ता। वेविभ्वंतरेतद्व्यभिचारित्वाहेत्वंतरमाह पृथिवीत्वादीतिव्यापकमपीति गगनादेरितिपूर्वेणान्वयः। नन्वेवंनिरू
क्तव्याप्तिज्ञानादघटोगगनवानित्यनुमितिः प्रमास्यादित्यतआह सिद्धिरपीतित्तथैववृत्त्यनियामकसंयोगेनैवतत्थाच
ताद्दशसंबंधेनगगनाभ्यनुमितेः प्रमात्वमिष्टमेवेतिभावः तेनासंबंधात्वादेरेवेतिभावः तेनासंबंधित्वादीति येनसंबं
धेनसाध्यसामानाधिकरण्यपरामर्शोभासत्तेत्तेनैवसंबंधेनसाध्यानुमितेः फलत्वादितिभावः। सामानाधिकरण्यधि
योहेतुत्वस्यतद्दशेसंबंधविशेषानिवेशस्यवानंगीकारमतेप्याह अव्यापकत्वाच्चेतितेनेत्यनुपद्यतेतत्थाचताद्द
शसंबंधेनसाध्यस्यहेतुव्यापकत्वं गत्स्यत्तेत्तेनैवसंबंधेनसाध्यसिद्धिः फलमतोवृत्तिनियामकसंबंधेनव्यापकत्वास
भवादेवनत्तेनसाध्यप्रमानुमितिः स्यादितिभावः ननुवृत्तिनियामकसंयोगेनापिगगनस्यपृथिवीत्वादिव्यापक
त्वं गृह्यतेतंदुवीरंताद्दशसंबंधेनगगनसंबंध्यप्रसिद्ध्या गगनाभावस्यप्रतियोगिव्यधिकरणत्वाभावात्ताद्दशाभावांतरप्र-
तियोगित्वस्यचगगनादावसत्वादतआह वृत्तौसादियादिवृत्तिनियामकसंबंधेनगगनादेरव्यापकत्वंतत्थाचनि-
रुक्तप्रतियोगित्वप्रतियोगित्वेत्यादिनावक्ष्यमाणप्रतियोगिसामानाधिकरण्यवृत्तिनियामकसंबंधेनगगनाभावे
पिस्थास्यतीतिभावः कालिकसंबंधेन गोत्वादौसाध्यताघटादिकालोपाधिमात्रवृत्तिघटत्वादिहेतौनाव्याप्तिः भिन्न

॥७२

धेयकानुमितिंप्रति गोत्वविशिष्टनिरवच्छिन्नविशेष्यताकभेदप्रतियोगितानवच्छेदकत्वज्ञानं हेतुरत्तो गोत्वत्वाग्रहे गो
त्वे सास्नादिव्यापकत्तावच्छेदकत्वग्रहसंभवाद्गोसाध्यकानुमित्तेर्नानुपपत्तिरस्तावत्लौकिकप्रत्यक्षएवाधिकरणताव
च्छेदकरूपेणत्वदुपस्थितेर्हेतुत्वादिति तत्तुच्छं व्यभिचारज्ञानाप्रतिबध्यतया तादृशमित्यनुग्रहस्यानुमित्यहेतुत्वा
दन्यथा तुल्ययुक्त्या भूत्वद्गोत्वविधेयकानुमितिंप्रति। निरवच्छिन्नगोत्वविशेष्यताकत्वैस्यप्रतियोग्यनधिकरणा
हेतुमन्निष्ठाभावाप्रतियोगित्वज्ञानस्य हेतुत्वादयं गौरित्यनुमितेर्गोत्वत्वाद्यनुपस्थितावपि गोत्वरूपधर्मे साध्यकत्व
स्य दुर्वारत्तापत्तेरिति दिक्। यच्चोक्तं गोत्तादात्म्यस्य सास्नाव्यापकत्वग्रहादेव गोत्तादात्म्येन सिद्धिसंभवेन तत्तदनु
रोधेन गोत्तादात्म्येन व्यापकत्वस्वीकारोयुक्तः संबंधगतव्यापकग्रहादेव संबंधिनोऽनुमित्तेर्मिश्राद्विसमर्थत्वा
दत्त उक्तं गोत्वत्वाग्रहदशायामिति गोतादात्म्यत्वाद्यग्रहदशायामित्यपत्त्याहुः ताश्चैत्त्वं गौरितिसिद्धतीति
परेणान्वयः गौर्व्यतिरेकादितितादात्म्येनेत्यनुपपद्यते। एवंचेति सामानाधिकरण्यादौ संबंधित्वप्रवेशेचेत्यर्थः संयो
गेन संयोगमात्रस्य प्रतियोगितावच्छेदकसंबंधत्वे वृत्त्यनियामकसंयोगस्यापितत्त्वे सर्वसिद्धिमतो मात्रपदं संबं
धरूपत्वद्युति अन्यथा तादृशसंबंधावच्छिन्नप्रतियोगिताकाभावाप्रसिद्ध्या गगनादेः पृथिवीत्वादिव्यापकत्वं दु
र्घटमितिस्यादिति भावः तादृशसंबंधस्य प्रतियोगितानवच्छेदकत्वेपि द्वितीयकल्पानुसारेणाव्यापकत्वं संपादयति

वएवमहाकालेप्रतियोगित्वधिकरणः सुलभः नचात्रविशेषणतात्ताविशेषशब्देन महाकालनिरूपितविशेषणतायाएवावि
वक्षितत्वात्तादृशसंबंधेननिरुक्तप्रतियोग्यधिकरणप्रसिद्धौ रुक्ताभावस्यापिप्रतियोगिवैयधिकरण्यासंभवदुक्तिवाच्यं
तथासतिकालवृत्तिधर्मस्यतादृशविशेषणतया किमपिव्यापकंनस्यादित्यस्येवसम्यक्त्वेऽपदव्यातिरिक्तेत्यभिधानत
स्यासदत्वविरोधापत्तेः स्वरूपसंबंधेनगगनादेर्वृत्तिमत्वादित्यग्रिमग्रंथविरोधाच्च महानसीयविशेषणतया गगनादेर्वृ
त्तिमत्वेपितादृशसंबंधसामान्येमहाकालान्यत्वविशिष्टघटत्वाद्यवच्छिन्नप्रतियोगिताकत्वविरहात्तादृशघटत्वाद्य
वच्छिन्नाभावस्येवनिरुक्तक्रमेणप्रतियोग्यधिकरणत्वसंभवेनपर्वतस्येवसम्यक्त्वादितिचेन्न तदानींमहाकालान्य
त्वविशिष्टोघटइत्यादिप्रतीत्यामहाकालस्यापितत्तत्कालोपाध्यवच्छेदेनमहाकालाद्यवच्छेदेनमहाकालान्यत्वविशि
ष्टघटवत्वादन्यथोक्तप्रतीत्याखंडकालावयवविशिष्टघटत्वावगाहनेवस्तुमात्रस्येवमहाकालेऽसत्वप्रसंगादिद
नींतदानीमित्यादिप्रतीतेर्महाकालाविषयिन्याः स्वरसतः कुत्राप्यसत्वान्नचैवखंडकालस्याधिकरणत्वेमानाभावः
पटध्वंसविशिष्टकालपटवदन्यत्वइत्यादिप्रमात्वानुरोधेनैवखंडकालस्यतथात्वादितिसिद्धान्तानुसारीपंथाः परंतुमहान
सीयवह्नित्वेनवह्निधूमोभयत्वेनवाऽवच्छिन्नप्रतियोगिताकस्यधूमसमानाधिकरणाभावस्यप्रतियोगितावच्छेदकत्वंवह्नि
त्वेप्यव्याप्तिभियावश्यं साध्यतावच्छेदकताघटकीयः साध्यवृत्तिधर्मस्तादृनवाच्छिन्नेवहेतुसमानाधिकरणाभावस्यप्रति

कालीनतत्तद्व्यक्तित्वावच्छिन्नाभावस्यैव घटादेः प्रतियोगिवैयधिकरण्यसंभवात्तदुक्तमंशद्रव्यातिरिक्तेति पृथिव्या
दिचतुर्द्रव्यातिरिक्तेति तु गगनत्वादेः कालत्वविरहादेव व्युदासादिति ध्येयं । कर्मात्मकखंडकालस्यापि भिन्नकालीन
तत्तद्व्यक्तित्वावच्छिन्नाभावस्यैव घटादेः प्रतियोगिवैयधिकरण्यसंभवात् तत्तियोग्यनाधिकरणत्वप्रसिद्ध्या तन्मात्रवृत्ति
स्पंदत्वादिहेतौ नाव्याप्तिरतश्चरमं द्रव्यपदेन तथाविधकालत्वाद्यावद्युक्तदिशानातिरक्तो मात्रपदं तादृशधर्मस्य म
हाकालत्वादेः समवायादिना व्यापकत्वसंयोगाद्यव्याप्यवृत्तेः स्वघटमत उक्तं । विशेषणातयेति ऽर्थः व्याप्यवृत्ति
प्रमेयत्वादेः प्रतियोगिवैयधिकरण्यघटितमेव कालिकसंबंधावच्छिन्नव्यापकत्वं संभवतीत्यत उक्तं अव्याप्यवृत्ती
तिता दृशसाध्यं च घटादिकं द्रव्यत्वादिकं च तद्वृत्तोपि कालस्य तदनाधिकरणदेशावच्छेदेन कालिकसंबंधावच्छिन्न
तदभावसत्वाच्च न ह्येवं विरोधः वाच्यत्वादिस्तदनधिकरणाप्रसिद्ध्या तदवच्छेदेन कालिकसंबंधावच्छिन्नेव [illegible] भा
वस्य कालेऽसंभवादिति भावः नस्यादित्तित्थाच कालो घटवान् महाकालत्वादित्यादौ व्याप्तिलक्षणाव्याप्तिरि
ति भावः प्रथमविवक्षानुसारेणादोषं संगमयति स्वावच्छेदकेति प्रतियोगितावच्छेदकसंबंधेनेत्यर्थः काले महाका
लेतत्संबंधावच्छिन्नत्वस्य साध्यतावच्छेदकीभूतकालिकसंबंधावच्छिन्नस्यासंभवादित्यग्रेणान्वयः द्वितीयवि
वक्षानुसारेणाह तेन संबंधेनेति साध्यतावच्छेदकीभूतकालिकसंबंधेनेत्यर्थः ननु महाकालान्याविशिष्टघटाभा

नाधिकरणत्वं हेतुमत्तद्वृत्त्येव वक्तव्यं तथा च शुद्धघटस्य साध्यतायां महाकालान्यत्वविशिष्टघटस्याभावो पि प्रतियोगिसमा-
नाधिकरण एव प्रतियोगिता च प्रतियोगितावच्छेदकधर्मस्वरूपेण लाघवान्न तु प्रतियोगिस्वरूपात्तेषामपि नानात्वेन
गौरवादत्तो नैकप्रतियोग्यधिकरणतामादाय संयोगी तत्त्वादित्यादौ तद्भिन्नं कालो घटवान् महाकालत्वादित्याद-
व्याप्तिवारणार्थमेवा विशिष्टसाध्ये पि प्रतियोगितावच्छेदकावच्छिन्नानाधिकरणत्वप्रवेशस्य प्रामाणिकत्तया गौर-
वस्याकिंचित्करत्वादिति ॥ सार्वभौममतमाशंक्य निराचष्टे न चेति वाच्यमिति परेणान्वयः तादृशसंबंधेनेति सा-
ध्यतावच्छेदकसंबंधेनेत्यर्थः वृत्तीत्यस्य प्रतियोग्यन्वितं तादृशपदस्य प्रतियोगितावच्छेदकावच्छेदकासंबंध-
परत्वेन पुनरग्रे प्रतियोगितासाध्यतावच्छेदकावच्छिन्नाग्रहस्यात् तादृशसंबंधेनेत्यस्य फलमाह सत्त्वादीति विषयत्ता-
याव्यापतियामकत्वे सत्त्ववति घटादौ ज्ञानाभावस्य सहजत एव प्रतियोगिवैयधिकरण्यं संभवतीत्यतः संयोगसा-
मान्यस्य चेति नाप्रसिद्धप्रतियोगितावान् संयोगवान्स्वासत्त्वादित्यादौ नातिप्रसंग इत्यर्थः सत्तावद्वृत्तित्वसामान्या-
भावस्य संयोगादावभावात् क्वातिव्याप्तिवारणमेव यत्किंचिदित्यस्यापि प्रयोजनमिति त्र्यवधेयं । प्रतियोगितावच्छेदक-
विशिष्टस्य फलमाह भूतत्वेति स्वयं मनसः स्वेद्रतादात्म्ये भूतत्वमूर्त्तत्वोभयसाध्यकमूर्त्तत्वस्य संदेहतामाशंक्य ॥९॥

योगित्वलक्षणे निवेशनीया प्रत्येकमुक्तं यत्र संबंधेन सत्तो धर्मस्य तादृशसंबंधेनोभयावृत्तित्वासंबंधेनोभयावृत्तित्वा
संभवे हेतुमन्निष्ठाभावप्रतियोगितापर्याप्त्यधिकरणाभिन्नत्वनिवेशप्रयोजनाद्येवं च प्रकृते महाकालान्यत्वविशिष्ट
घटत्वाद्यवच्छिन्नाभावस्य प्रतियोगितायाः साध्यतावच्छेदकीभूतकेन महाकालान्यत्ववैशिष्ट्यरूपसाध्यनिरूपकसं
णावच्छिन्नत्वात्तादृशप्रतियोगिताकाभावमादायन प्रतियोगिव्यधिकरणाभावस्याप्रसिद्धिसंभावना प्रीतिकार्डः ता
च्चितं प्रमेयवान्वाच्यत्वादित्यादौ हेतुसमानाधिकरणतादृशप्रतियोगिताकाभावाप्रसिद्ध्याऽव्याप्तिप्रसंगात् उक्तं तो
यादृशप्रतियोगितावच्छेदकविशिष्टस्यानधिकरणत्वं हेतुमत्तद्वृत्तित्वत्वावच्छेदकवैशिष्ट्यमवश्यं साध्यतावच्छेदकघ
टकसंबंधमात्रेणवाच्यं अन्यथा तत्तन्न्यायः पिंडस्यापि कालिकसंबंधेन यद्धूमत्वविशिष्टं वह्न्यादिकं संयोगेन तदधिक
रणतया धूमवान्वह्नेरित्यादावतिव्याप्त्यापत्तेरित्थं च यत्र समवायेन घटादिविशिष्टस्य कालिकसंबंधेन साध्य
ता च महाकालान्यत्वविशिष्टघटत्वावच्छिन्नाभावस्य साध्यतावच्छेदकताघटकसंबंधमात्रेण प्रतियोगितावच्छेदका
वच्छिन्नत्वमप्रसिद्धस्वरूपसमवायाभ्यामेव तत्र तथात्वात् विशिष्टनिरूपितसमवायानभ्युपगमादतस्तादृशाभाव
मादायन प्रसिद्धिसंभव इति ध्येयं । यत्तु साध्यभेदेन व्याप्तेर्विभिन्नत्वाद्विशिष्टसाध्यकस्थल एव यादृशप्रतियोगि
तावच्छेदकावच्छिन्नानधिकरणत्वं हेतुमत्तद्वृत्तित्वं वक्तव्यं अविशिष्टसाध्यकस्थले तु यादृशप्रतियोगितायानधि

व्या १ जि ८

करणांतत्तत्संबंधसाध्यतावच्छेदकसंबंधेनतत्तद्धर्मावच्छिन्नसामानाधिकरण्यमेवलाघवाद्व्याप्तिरस्त्वितिवाच्यं घटवृत्तित्ववि
शिष्टद्रव्यत्ववान्घटत्वादित्यादावव्याप्तिः केनापिसंबंधेनहेतुमतः साध्यतावच्छेदकावच्छिन्नसामानाधिकरण्यासंभवा
दितिप्राञ्चः तादृशसंबंधसामान्यइत्यस्यपूर्ववदर्थोबोध्यः क्वचित्साध्यतावच्छेदकसामान्यइत्येवपाठः विवक्षितत्वादिति
अभावांतमूलग्रंथेनेत्यादिः तथाचसाध्यतावच्छेदकसंबंधसामान्येयादृशप्रतियोगितावच्छेदकावच्छिन्नप्रतियो
गिकत्वहेत्वधिकरणीभूतयत्किंचिद्व्यक्त्यनुयोगिकत्वसामान्योभयाभावस्तादृशप्रतियोगितानवच्छेदकीभूतसाध्य
तावच्छेदकावच्छिन्नसामानाधिकरण्यंव्याप्तिरित्यर्थः घटसंयोगेपर्वतासंयोगेवाहेतुमन्महाकालानुयोगिकत्व
वह्नित्वावच्छिन्नप्रतियोगिताकत्वोभयाभावसत्वाद्वह्निमान्धूमादित्यादावव्याप्तिरतः सामान्यपदं तथाचमहा
नसीयवह्निसंयोगएवतादृशोभयाभावविरहान्नाव्याप्तिः संयोगसामान्यएवचहेतुमद्यौगिकधूमत्वावच्छिन्नप्र
तियोगिकत्वोभयाभावसत्वाद्धूमवान्वह्नेरित्यादौनातिव्याप्तिः संयोगसामान्यएवसमवायतिष्ठपर्वतानुयोगि
कत्वस्यवह्नित्वावच्छिन्नप्रतियोगिताकस्यचद्वयोरभावसत्वात्तथैवाव्याप्तिरतः सामान्येोभयेतितादृशोभयाभावः स्वरू
पसंबंधेनबोध्यः तेनसमवायादिनातदुभयाभावस्यसंबंधमत्रेसत्वेपिसद्धेतौनाव्याप्तिः एतद्घटवान्एतद्घटत्वादित्या
दौएतद्घटत्वावच्छिन्नप्रतियोगिकत्वविशिष्टतद्घटानुयोगत्वाप्रसिद्धेरन्याभावांतरमादायातिव्याप्तिवारणाय नेप्र

जेलकाउ चा ८

गुणकर्मान्यत्वेति आदिविशिष्टांतद्वयं मतो गुणयोः कर्मणोश्चान्वितं दृष्टं च विशिष्टस्यानतिरिक्तत्वं विशिष्टधर्मावच्छिन्ना
धेयत्वस्यातिरिक्तत्वमित्यभ्युपेत्य अन्यथासार्वभौममतेनाधेयत्वस्यैकविशिष्टापररूपत्वे मूर्त्तत्वमूर्त्तत्वोभयसाध्यक
मूर्त्तत्वस्य सद्धेतुतामाशंक्य गुणकर्मान्यत्वविशिष्टसत्तयोरतिरिक्ततया सद्धेतुत्वमतो गुणादिवृत्तितया प्रतियोगिता
वच्छेदकविशिष्टेत्यभिधानमसंगतं। सामान्यपदस्य फलमाह संयोगसामान्येति तथा च संयोगिद्रव्यत्वादित्यादाव
व्याप्तिवारणार्थमेव सामान्यपदमिति भावः विशिष्टस्येति तथा च विशिष्टसत्तावान् जातेरित्यादावतिव्याप्तिरिति भावः न
नुत्तादृशसंबंधावच्छिन्नतयात्किंचिद्धेत्वधिकरणवृत्तितानवच्छेदकप्रतियोगिता[illegible]वच्छेदकत्वं सामान्यं तेन विवक्षि
तं अतो नोक्तदोष इत्यत आह समवायेनेति ननु समवायेन जातेर्व्याप्यवृत्तित्वात्तत्साध्यके प्रतियोगिवैयधिकरण्यमेव तद्दे
यं देयं चाव्याप्यवृत्तिसाध्यकस्थलीयनिरुक्तौ साध्यतावच्छेदकेऽव्याप्यवृत्तितानिरूपकत्वं विशेषणमतो न तत्र तल्लक्ष
णस्यातिव्याप्तिरत आह संयोगादीति अत्र विशिष्टनिरूपिताधेयत्वस्यातिरिक्तत्वोपगमे प्रतियोगितावच्छेदकावच्छिन्नत्व
साध्यतावच्छेदकसंबंधावच्छिन्नोभयाभाववद्धेत्वधिकरणयत्किंचिद्व्यक्तित्वसामान्यत्वकस्य विवक्षणान्नोक्तापि दोष
इत्यस्मद्गुरुचरणाः। न व्यासक्तसाध्यतावच्छेदकसंबंधेन यावद्धेत्वधिकरणीको यो यत्तदन्यत्वं प्रतियोगितावैयधि
करण्यं वाच्यमतो गगनाभावमादायैव प्रसिद्धिर्न कोपि दोषः न चैवं य[illegible]संबंधेन यद्धर्मावच्छिन्नानाधिकरणहेत्वधि

अ ५

वृत्तिप्रतियोगि २

यथार्थ

किंचित्प्रतियोगिकं ३ ना २ प्रतियोगिकसंबंधत्व ४ यां

॥१२॥

नैव वाच्यमिति सांप्रतं अत एवेत्यादिविवक्षणमाणग्रंथासंगतिप्रसंगात् समवायस्यैकत्वेपि तदवच्छिन्नद्रव्यत्वाधिकरणत्ताविनिरुक्तोभयाभावसत्वेन द्रव्यं ज्ञातेरित्यादावतिव्याप्त्यापत्तेरिति चेन्न संयोगः पर्वते वह्नेः संबंधीन तु वह्नौ पर्वतस्येत्यादिप्रतीत्या हि किंचिदनुयोगिकत्वं च संबंधत्वमनुभवसिद्धं कुत्रचिदेव संयोगादीनामनु सर्वयत्तत्र स्वरूपसंबंधविशेषोऽतिरिक्तो वेत्यन्यदेतत् तथाच साध्यतावच्छेदकसंबंधसामान्ये निरुक्तप्रतियोगिसंबंधे तद्धेत्वधिकरणीभूतपात्किंचिद्वृत्त्यनुयोगिकसंबंधत्वोभयाभावस्य विवक्षणाद्धूमसंयोगस्यायोगोलकानुयोगिकसंसर्गत्वविरहादेव नातिप्रसंगस्तत्प्रतियोगिकस्यैव तत्तदनुयोगिकसंबंधत्वात् एतेन वह्निमान् धूमादिनाग्निरूपादित्यत्राव्याप्तिः साध्यविशिष्टधीनियामकस्यैव तत्तदनुयोगिकसंबंधत्वात् एतेन वह्निमान् धूमादिनाग्निरूपादित्यत्राव्याप्तिः पर्वते वह्निसंयोग एव प्राग्वह्निप्रतियोगिकत्वहेत्वधिकरणीभूतवह्न्यनुयोगिकत्वोभयाभावविरहात् विशिष्टधीनियामकस्यैव वह्निसामान्याभावलक्षणाघटकादित्यपास्तं पर्वते वह्निसंयोगस्य हेतुमद्वह्निमत्तावच्छेदकत्वेपि वह्न्यनुयोगिकसंबंधत्वविरहेण तत्तादृशोभयाभावसत्त्वात् द्रव्यत्ववधात्वव्याप्ययैकसंयोगेऽव्याप्तेः यत्पदार्थवृत्तित्वेपि तदनुयोगिकसंबंधत्वविरहेण तत्तादृशोभयाभावसत्त्वात् द्रव्यत्ववधात्वव्याप्ययैकसंयोगे यत्पदार्थवृत्तित्वेपि तदनुयोगिकसंबंधविरहेणातिव्याप्तिस्तद्वयोः परस्परं विशिष्टधीप्रमात्वं तयोरेकस्मिन्संयोगे न साध्येतद्वीयरूपादित्यादावव्यभिचारिण्यतिव्याप्तिस्तदुभयोः परस्परं विशिष्टधीप्रमात्वं तयोरेकस्मिन्संयोगे न साध्येत द्वीयरूपादित्यादौ व्यभिचारिण्यतिव्याप्तिस्तद्भुतयथावह्न्यधिकरणसामान्यसंयोगस्य निरुक्तोभयाभावविरहादिति यत्किंचिदित्यस्य फलमाह धूमसंयोगवृत्ति अन्यथा वह्न्यधिकरणसामान्यसंयोगस्य निरुक्तोभयाभावविरहादिति यत्किंचिदित्यस्य फलमाह धूमसंयोगवृत्ति अन्यथा वह्न्यधिकरणसामान्यसंयोगस्य निरुक्तोभयाभावविरहादिति यत्किंचिदित्यस्य फलमाह धूमसंयोगवृत्ति अन्यथा वह्न्यधिकरणसामान्यसंयोगस्य निरुक्तोभयाभाव

त्वा ५८ त

॥१२॥

राम

त्ति योगिकत्वरीविशिष्टमहाकालानुयोगिकत्वाप्रसिद्धा गगनाभावमादाय प्रसक्ताव्याप्तिवारणासंभवः स्यादतोक्तं तत्-
प्रतियोगिकत्वविशिष्टयत्किंचिद्वृत्त्यधिकरणानुयोगिकत्वसामान्याभावपरित्यज्य तत्-तत्सामान्याभाववत्त्वं तच्चय-
दृश प्रतियोगितावच्छेदकावच्छिन्नप्रतियोगिकसंबंधसामान्ये हेत्वधिकरणयत्किंचिद्वृत्त्यनुयोगिकसाध्यतावच्छेदकसं-
बंधत्वस्य तथाविधसंबंधसामान्ये वा यादृश प्रतियोगितावच्छेदकावच्छिन्नप्रतियोगिकत्वस्य व्यतिरेकस्तादृशप्रतियो-
गितावच्छेदकत्वमेव साध्यतावच्छेदकस्य कथं नोक्तमिति वाच्यं द्रव्यवान् प्रमेयत्वादित्यादौ संयोगेन साध्यतायामति-
व्याप्त्यापत्तेः प्रमेयानुयोगिकसंयोगसामान्ये द्रव्यत्वावच्छिन्नप्रतियोगिकत्वेन साध्याभावस्य लक्षणघटकत्वादि-
ति ध्येयं। एवं च कालिकसंबंधसामान्ये महाकालानुयोगिकत्वसत्वेपि गगनप्रतियोगित्वविरहाद्गगनादेरभावएव
घटवान् महाकालत्वादित्यादौ प्रतियोगिव्यधिकरणतायाप्रसिद्धत्वान्नः। ननु हेत्वधिकरणीभूतयत्किंचिद्व्यक्त्य-
नुयोगिकत्वं यदि तद्व्यक्तित्वं तदा धूमवान् वह्नेरित्यादावतिव्याप्तिः धूमप्रतियोगिकस्यापि संयोगस्य कालिकसंबंधे-
नायोगोलकवृत्तित्वात् यदि च साध्यतावच्छेदकसंबंधस्य संसर्गतानियामको यः संबंधस्तेन हेत्वधिकरणवृत्तित्वमेव य-
त्तदनुयोगिकत्वं तदा संयोगेन द्रव्यस्य साध्यतायां त्यन्यतरत्वादित्यादावतिव्याप्तिर्जातेः समवायेन वृत्त्यप्रसिद्धेः तच्च
साध्यतावच्छेदकसंबंधाधिकरणतासामान्ये निरुक्ताभयाभावत्वं विवक्षितं तत्र च हेत्वधिकरणवृत्तित्वं स्वरूपसंबंधे

वह्निव्या १

वं १

अ व अ.मा.७

कालाभावेन वह्निधूमोभयत्वावच्छिन्नाभावमादायैवातिव्याप्त्यसंभवात् तथापि साध्यसाधनभेदेन व्याप्तिभेदात् व्यासज्य
वृत्तिधर्मेण साध्यतायां निरुक्तमपहाय यादृशप्रतियोगिताया[illegible]प्रतियोगिकं घटितोभयाभावस्यैव प्रवेशान्नोक्त
स्थलेऽव्याप्तिः न चैवमुभयत्वेन साध्यतायां व्यभिचारिण्यतिव्याप्तिस्तद्दोषस्यात एवेत्यादिना वह्निधूमोभयवान्
वह्नेरित्यादौ ग्रन्थकृतैवाग्रे वक्ष्यमाणत्वादिति वस्तुतस्तु संबंधत्वस्यैकप्रतिकापरानुयोगिकत्वनियमादेव
वह्निधूमोभयत्वावच्छिन्नप्रतियोगिताकसंबंधप्रसिद्धेवतद्भिन्नयत्वावच्छिन्नाभावस्य लक्षणाघटकत्वान्नाव्या
व्याप्तिरत एवात्र वह्निधूमोभयवान् वह्नेरित्यादावतिव्याप्तिरप्यभेदास्य तेन च वह्निधूमोभयत्वावच्छिन्नप्रकारित्वादावे
वतादृशोभयत्वावच्छिन्नप्रतियोगिताकसंबंधत्वप्रसिद्धिसंभवः प्राचां मते प्रकारित्वाभावाद्विशिष्टनियामकस्यैव तत्वा
दिति ध्येयं। न चैवमपि घटवान्नित्यज्ञानत्वादित्यत्राव्याप्तिर्विषयितासंबंधेन गगनीयत्वनित्यज्ञानानुयोगिकोभयसत्वेन
गगनाभावमादायाभिन्नप्रसिद्ध्यसंभवादिति वाच्यं तादृशसंबंधेन घटादेर्व्याप्यवृत्तितया तत्साध्यकेप्रतियोगिवैयधिक
रण्यस्यैवाप्रवेशादिति ध्येयं अत्र वयं ब्रूमः साध्यतावच्छेदकसंबंधावच्छिन्नप्रकृतसाध्याधिकरणतानिरूपितस्वरूपसं
बंधेन यादृशप्रतियोगितावच्छेदकावच्छिन्नाधिकरणतासामान्याभाववत्त्वं हेतुमन्निष्ठतादृशप्रतियोगितानवच्छेदकत्व वि
वक्षयैव सामंजस्ये निरुक्तप्रतियोगिप्रतियोगित्वेत्यादिखंडशः प्रसिद्धिविफला कालो घटवान् कालत्वा[illegible] ॥१९॥

मेरु ९

दे सवला कट

वह्नेरित्यत्राति प्रसंगः स्यादिति भावः षष्ठ्य० तत्रयं विरहादित्यन्वयि निरुक्तपदस्य फलं तत्र फलमाह चैत्रान्यत्वेति निरुक्तपदा
नुक्तौ चैत्रान्यत्वविशिष्टे तद्दण्डवान्नेति दण्डादित्यत्र चैत्र वृत्तेर्या दण्डसंयोग एव चैत्रान्यत्वविशिष्टे तद्दण्डाभावप्रतियोगिकत्वे
हेत्वधिकरणीभूत चैत्रानुयोगिकत्वोभयाभावविरहात् तादृशदण्डाभावस्य लक्षणाघटकतयातिव्याप्तिः स्यात्तदुपादाने तु चैत्रा
न्यत्वविशिष्टे तद्दण्डत्वावच्छिन्नप्रतियोगिकत्वस्याभावादेव तत्रोभयाभावसंभवेन नातिव्याप्तिरिति भावः यदि च प्रतियोगिता
प्रत्याश्रयं नाना तदा चैत्रान्यत्वविशिष्टदण्डत्वावच्छिन्नं यत् चैत्रावृत्ति दण्डनिष्ठप्रतियोगित्वं तदाश्रयप्रतियोगिकत्वहेत्वधिक
रणीभूत चैत्रानुयोगित्वोभयाभावस्य संयोगसामान्ये एव सत्त्वान्निरुक्तपदं विनापि नातिव्याप्तिः संभवतीत्यत स्तन्मते
साधारण्येनातिव्याप्तिरक्षार्थमुक्तमेतदिति संयोगेन साध्यतायां निरुक्तपदस्य व्यावृत्तिमुक्त्वा समवायेन साध्यतायां तत्

स्यैव

माह गुणकर्मान्यत्वेति इदं च समवायस्य नानात्वमभिप्रेत्य तस्यैकत्वे तु तस्यैकगुणानुयोगिकविशिष्टसत्त्वप्रतियोगिकत्वो

त
वान

भयसत्त्वेनातिव्याप्तितादवस्थ्यात् । यद्यपि तादृशप्रतियोगितावच्छेदकावच्छिन्नेत्युक्तौ वह्निधूमोभयं धूमादित्यत्राव्याप्ति
ः संयोगसामान्य एव वह्निधूमोभयत्वावच्छिन्नप्रतियोगिताकत्वपर्वतानुयोगिकत्वोभयाभावसत्त्वात् न च निरुक्तप्रतियोगि
तावच्छेदकावच्छिन्नत्ववत्ताप्रमायां दुर्घटत्वापत्तेरिति वाच्यं तथा सत्यत एव स्यादि नाग्रे वक्ष्यमाणाया वह्निधूमोभयवान्
वह्नेरित्यतिव्याप्तेः संगतत्वापत्तेः वह्निधूमोभयवन्नियामकसंयोगमात्रस्यैव हेत्वधिकरणीभूतायोगोलकानुयोगि
२
ज्ञांसंगीक विषयत्वमेव निरुक्तप्रतियोगिकत्वं वाच्यं तत्र पर्वतवह्निधूमयोः प्रत्येकसंयोगस्या
व्यक्तीति नाव्याप्तिः अन्यथा संयोगेन वह्निधूमौ स्यातां इति प्रत्यापाय २

वच्छिन्नप्रतियोगितायाः संयोगसामान्यावच्छिन्नत्वात् संयोगत्वस्य तादृशसंबंधतावच्छेदकत्वात् स्थलएवतथा

त्वादित्थं यद्धर्मावच्छिन्नेत्यत्रापि क्वचित्तादृशधर्मावच्छिन्नेति बोध्यं। तेन दंडिमान् दंडसंयोगादित्यादौ तादृशप्रति

योगितायास्तत्तद्दंडावच्छेदकत्वसंयोगावच्छेद्यत्वात् भथाभावसत्वेपि नाव्याप्तिः प्रमेयत्वावच्छेदकत्वविशिष्टस्वरू

पसंबंधावच्छिन्नत्वाप्रसिद्ध्या प्रमेयवान् वाच्यत्वादित्यादावव्याप्तेरतो विशिष्टाभावमपहाय तादृशो भयाभावगर्भ

नच निरुक्तप्रतियोगिव्यधिकरणहेतुमन्निष्ठाभावीय यद्धर्मावच्छिन्नप्रतियोगितासामान्ये यद्धर्मावच्छिन्नो भा

वस्तत्संबंधेन तद्धर्मावच्छिन्नं व्यापकमित्युक्तं। धर्मांतरावच्छिन्नाभावाप्रवेशेन त्वा घवादिति वाच्यं घटत्वत्वविशिष्ट

शिष्टद्रव्यवान् घटत्वादित्यादावव्याप्तेः तादृशद्रव्यत्वाभावमादाय कथं चित्तत्र लक्षणसमन्वयेपि दं मित्वविशि

ष्टप्रमेयवान् स्थूलदंडित्वादित्यत्राव्याप्तिः केनापि संबंधेन हेतुमतः साध्यतावच्छेदकावच्छिन्नानधिकरणत्वासं

भवादिति भावः तेन संबंधेनेति नचैवमं योगितानिरूपस्य पृथिवीत्वव्यापकतापत्तिस्तेन संबंधेन रूपाभावप्रतियो

गस्यानधिकरणाप्रसिद्धेरिति वाच्यं तथाखेपि तेन संबंधेन प्रतियोगि सामानाधिकरण्यप्रसिद्ध्यैव व्याप्तिलक्षणस्या

तिव्याप्तिविरहात् यद्धर्मेत्यत्र धर्मस्य साध्यतावच्छेदकसंबंधाधिकरणतानिरूपकत्वेनाविशेषणीयत्वान्न च द

मा ध्यत्वक्वेदकी भूतसंयोगसंबंधावच्छिन्नसंभवापेन १ तावच्छेदक १

वछि ला १

प ८

साव्य १

साध्य २

॥२३॥

ना॰न्या॰ ५

त्वादित्यादौ कालिकसंबंधावच्छिन्नघटाधिकरणानिरूपितस्वरूपसंबंधेन पटत्वाद्यवच्छिन्नाधिकरणत्तासामा
न्यस्यैवाभावस्य निरुक्तप्रतियोगिव्यधिकरणपस्य सुलभत्वादित्यर्थः। एवं यादृशप्रतियोगितावच्छेदकावच्छिन्नप्र
तियोगिकसंबंधसामान्ये साध्यतावच्छेदकसंबंधत्वहेत्वधिकरणीभूतयत्किंचिद्व्यक्तित्वघवृ योगिकसंबंधत्वोभयाभाव
स्तादृशप्रतियोगिताकथं नोक्तेति चिंतनीयं। [illegible]स्यञ्जगदाधारत्वप्रवादमनुसृत्याह स्वरूपसंबंधेनेति कालि
कविशेषणेतयेत्यर्थः तथा चोक्तप्र[illegible]पि गगनाभावेन प्रतियोग्यनधिकरणाद्गति घटवान् महाकालत्वा
दित्यादावव्याप्तिस्तद्वस्थैवेति भावः निरुक्तेति प्रतियोगितावच्छेदकसंबंधेन यादृशप्रतियोगितावच्छेद
कावच्छिन्नासंबंधित्वं हेतुमत्तस्तादृशप्रतियोगितासामान्ये तथा च संयोगादिना घटाद्यभावमादायैव घ
टवान्महाकालत्वादित्यत्र संगतिः घटाद्यभावप्रतियोगितायां धूमत्वाद्यवच्छिन्नसंयोगसंबंधावच्छिन्नत्वोभय
भावसत्वेन धूमत्वादिना वह्न्यादिव्यापकवारणाय सामान्येति तथा च धूमवान्त्तित्युतादृशप्रतियोगिताया
मेव तद्वृत्तयसत्वाददोषः यत्संबंधेति क्वचित्तादृशसंबंधावच्छिन्नेत्यपि दृश्यते। शब्दैक्यस्यानुपादेयत्वात्तत्ते
न धूमवतितत्संयोगसंबंधेन वह्निसामान्याभावसत्वेपि नाव्याप्तिः तत्तत्संयोगावच्छिन्नप्रतियोगितायाः संयोग

कानो ४

धेत्तावच्छेदकसंबंधेनाभावात्येत्ता दृशोभयाभावविवक्षयैव सर्वसामंजस्येकृति विवक्षांतरेण घटवान् महाकालत्वादित्य
त्र घटीयविशेषणतायां घटत्वावच्छिन्नप्रतियोगिताकत्वविरहेण घटाद्यभावस्यैव प्रतियोगित्वे याधिकरणासंभवात्
कालः प्रमेयवान् महाकालत्वादित्यत्र च कालिकसंबंधेन च प्रमेयसामान्यस्य तथाप्यवृत्तित्वात्प्रतियोगिवैयधि
करण्यस्यैवानुपादेयत्वेन निरूपघत्वा[illegible]तः पूर्वकल्पे दोषांतरमाह तत एवेति यद्यपि संयोगमात्रस्यैव हित्वावच्छिन्न
प्रतियोगिताकत्वविरहाद्वह्निधूमत्वावच्छिन्नप्रतियोगिकत्वविरहाद्वह्निधूमोभयत्वावच्छिन्नप्रतियोगिकत्वविरहा
द्वह्निधूमोभयत्वावच्छिन्नाभावाभावमादायैव नातिव्याप्तिसंभवनात्तथापि वह्निधूमोभयवान् वह्नेरित्यादौ संयो
गस्य हित्वावच्छिन्नप्रतियोगिताकत्वविरहेण समवायस्योभयत्वेन द्रव्यत्वजातेरित्यादौ नातिव्याप्तिरिति योजना विरहेपि
तु नित्विकारस्तु प्रमादिक इति प्राञ्चः वस्तुतः संयोगः संबंधमात्रस्यापि हित्वावच्छिन्नप्रतियोगिकत्वविरहेण समवायस्यो
भयत्वे तत्सिद्धावपीत्यर्थस्तथा च संबंधमात्रस्यैकप्रतियोगिकसंबंधत्वनियमेन वह्निधूमोभयत्वावच्छिन्नप्रतियोगिक
संबंधस्याप्रसिद्ध्या तादृशप्रतियोगिकत्वस्य लक्षणघटकत्वेपि वह्निधूमोभयवान् वह्नेरित्यादौ नातिव्याप्तिः प्रकारान्तरा
दिः संसर्गत्वे मानाभावात्तद्व्यावृत्तिन्तु प्रागेव प्रपंचितमस्माभिः। केचित्तु वह्नेरित्यत्र धूमादित्तिनातिव्याप्तिरित्यनन्तरं चाव्या
प्तिर्वेति पाठं कल्पयंतो द्रव्यं जातेरित्यादावतिव्याप्तिं वह्निधूमोभयवान् धूमादित्यत्र चाव्याप्तिमेव पूर्वलक्षणादोषस

॥१४॥

यद्धर्मावच्छिन्नत्व २   न१

क५

त्यानियामकसंवंधेनसाध्यतायामव्याप्तिस्तादृशसंवंधस्यापिप्रतियोगितावच्छेदकत्वपक्षएवेतान्निरुक्तयादृशत्त
निरुक्तप्रतियोगितासामान्येयत्संवंधातिरिक्तसंवंधावच्छिन्नत्वोभयाभावस्तत्संवंधेनतद्धर्मावच्छिन्नस्यव्यापकत्व
मितितुनयुक्तंवृत्त्यनियामकसंवंधेनसाध्यतायांव्यभिचारिण्यतिव्याप्त्यापत्तेः यद्वास्वावच्छेदकताघटकसंवंधे
नयादृशप्रतियोगितानवच्छेदकानधिकरणहेत्वधिकरणंतादृशप्रतियोगितासामान्येयद्धर्मावच्छिन्नावच्छेदकता
कत्वयत्संवंधावच्छिन्नावच्छेदकतात्वोभयाभावस्तेनसंवंधेनतद्धर्मावच्छिन्नव्यापकत्वंविवक्षितंवृत्त्यनियाम
कसंवंधस्यप्रतियोगितावच्छेदकत्वाभावेपिप्रतियोगितावच्छेदकघटकसंवंधेनसर्वसमानत्वमेवचैत्रेनपचती
त्यादौवृत्त्यनियामकानुकूलत्वसंवंधेनपाकविशिष्टायाः कृतेरन्नावस्यचैत्रादावन्वयदर्शनातव्यभिचारिणि
पुसाध्यवत्तासामान्याभावप्रतियोगितायामेवतादृशोभयाभावविरहान्नाव्याप्तिरितितुनव्याः ननुव्याप्यवृत्तिसाध्य
कस्थलेपूक्तक्रमेणेवव्यापकत्वंनिर्वाच्यमन्यथादंडिमानित्यादौदंडित्वादिप्रकारेणव्यापकत्वान्तानुपपत्ते
स्तथाचप्रमेयवान्घटत्वादित्यादावव्याप्तिः प्रमेयत्वावच्छिन्नस्याप्रसिद्धेः नचप्रकारित्वाद्यैतासिद्धिः प्रतियो
गितायाएवावच्छेद्यतायाः प्रकृतेनिवेशनीयत्वात्तन्यथाप्रकारकत्वप्रतियोगित्वसाधारणोकावच्छेद्यत्वविरहे
णाव्यभिचारिण्यतिव्याप्त्यापत्ते [illegible] त आह समवायेनेतिस्वरूपसंवंधेन गगणारेर्वृत्तिमत्त्वेपिप्रकृतसाध्यीयसा

२१   त्व३

स्समनियतत्वापि च समवेतत्वस्य पृथिवीसमवेताभावप्रतियोगितावच्छेदकत्वमतिप्रसंगात् एवं घटरूपत्वस्य समनियतत्वमपि रूपघटत्वं
व्याधिकरणसंयोगादिसंबंधावच्छिन्नघटरूपत्वाभावस्य प्रतियोगितावच्छेदकमतः समनैयत्यमकिंचित्करं घटत्वावच्छेदकत्व
स्वीकारेऽतिप्रसंगाद्यभावः स एवावच्छेदक इत्याशयेनाह संभवतीति अतिप्रसंगाद्यनापादकेन संभवतीत्यर्थः प्रमेये सधूम
त्वस्य तादृशप्रतियोगितावच्छेदकपर्याप्त्यधिकरणत्वे धूमत्वानधिकरणत्वातिरिक्ताद्याह कंबुग्रीवेति न च कंबुग्रीवादिमत्व
कंबुग्रीवादिव्यक्तिरेव सा च प्रत्येकं हेतुमन्निष्ठाभावप्रतियोगितावच्छेदिकेति नातिव्याप्तिरिति वाच्यं परम्परया
संस्थानगतकंबुग्रीवादिजातिमत्त्वस्यैव साध्यतावच्छेदकत्वात् तस्य च परंपरयावच्छेदकत्वकल्पनामपेक्ष्य लाघवेन
घटत्वस्यैव साक्षात्तथात्वादिति भावः ननु पृथिवीत्वतेजस्त्वादिना सांकर्यात् घटत्वं जातिर्न तदा नैकमपि घट
त्वं कंबुग्रीवादिमत्त्वसमनियतमत आह घ्राणेति घ्राणग्राह्यगुणत्वापेक्षया लाघवाद्ग्राह्य गंधत्वस्यैव प्रतियोगितावच्छे
दकत्वादिति भावः घ्राणग्राह्यगुणत्वं घ्राणग्राह्यत्वे सति गुणत्वव्याप्यजातित्वं तेन गंधत्वस्य लाघवः समनैयत्येन
तात्पर्यमित्यपि कश्चित् । व्यभिचारिणि प्रमेयत्वादौ स्वरूपसंबंधात्मिकाया इति प्रतीत्यर्थिकेति भिन्नत्वे हेतुः तत्तदभावप्रति
योग्युभयस्वरूपाया इत्यर्थः तत्तत्प्रतियोगिमात्रस्वरूपत्वसामान्याभावविशेषाभावयोः प्रतियोगितायामविशे
षापत्तिरिति ध्येयं । धूमत्वादेरपीति तथा धूमवान्वह्नेरित्यादौ व्याप्तिलक्षणातिव्याप्तिरिति भावः न चेति वाच्यमित्यग्रेतन

संगमयेत्ति । ननु स्वरूपसंबंधात्मकप्रतियोगित्वस्य विशिष्टधीजनकत्वरूपसंबंधताघटकनियमघटितत्वात् न्योन्याश्र
यत्वमत आह प्रतियोगित्वादीति आदिनावच्छेदकत्वादिपरिग्रहः नसंबंधत्वेनेति प्रतियोगितत्वादिधर्मत्वप्रकारेण
हेतुमान्निष्ठाभावीयत्वप्रकारेणैवतत्प्रवेशादिति भावः । संयोगत्वादिनेवेति संबंधविषयेत्यादिः ननु प्रतियोगिताद्वयमपि
स्वरूपसंबंध एवेत्युक्तदोषतादवस्थ्यं । किंच वृत्त्यनियामकसंबंधेन हेतुतास्थले हेतुसंबंधित्वस्यावश्यं प्रवेशनीयत्वादि
त्यत आह संबंधित्वेन निवेशेपि न क्षतिरित्याशयेनाह एवं चेति विशेषणत्वविशेषणतान्यविशिष्टधीविषयत्वस्यैव संबंधतास्वरू
पत्वादिति भावः भावसामान्यभिन्नत्वरूपस्याभावत्वस्य प्रवेशे घटत्वाभाववान् घटत्वादित्यत्राव्याप्तिरत आह अभावत्वे
चेति इदमिहेत्यादीदं स्यात्तत्राभावत्वान्योन्याभावत्वयोर भावत्वयोरत्यन्ताभावत्वगर्भतामभिप्रेत्य तयोरन्योन्य गर्भता यां त्वाह
तदापरेति अन्त्याभावत्वमपि वेत्यर्थः अपरोभावो यो ऽतिरिक्तो विषयतापन्नत्वस्य नैयायिकेन तार्किकेन स्वीकारात्तस्य ह
षृतत्ता । तत्त्वादीति विषयत्वादीत्यर्थः तत्त्वादिनाचेदंत्वस्यापग्रहः तत्त्वेदंत्वयोः पदार्थान्तरत्वं विनाद्ववारत्वात्त्रैव पर्यव
मानादित्याकूतं गत्वेत्ति प्रतियोगितात्वाधिकरणत्वेनेत्यर्थः ॥ इति प्रतियोगिव्यधिकरणलक्षणांसंपूर्णं ॥ ० ॥ अथावच्छे
दकलक्षणटिप्पनी ॥ इद्ध अनवच्छेदकत्वमित्यत्रावच्छेदकत्वमवच्छेदकपदार्थः । विशिष्टसत्तात्वसमनियतस्य सत्तात्वस्य
लघुनोपि नाविशिष्टाभावप्रतियोगितावच्छेदकत्वं गुणादावपि सत्तानास्तीति प्रत्ययप्रसंगात् पृथिवीसमनैयत्वेसमनि

लक्षणासंभव इति भावः एतेनेत्यादिकं कक्षाविल्कं तत्र सतेनेतानीतातो भयाभावमादाय तत्तत्तद्दोषेण आमान्याभावप्र
तियोगित्वमेकमेव समस्तप्रतियोगिवृत्तीति तदनतिरिक्तत्वं तेवं धूमत्वमतो नातिव्याप्तिरिति प्राग भोक्तं दूषयति
अत एवेति न करीत्यावह्नित्वादावच्छेदकत्वप्रसंगादित्यर्थः ननु प्रतियोगितानवच्छेदकामित्यत्रावच्छेदकत्वं स्वस
पर्सर्वध एव वाच्यं अवच्छेद्यप्रतियोगितावच्छेदकत्वेन च साध्यतावच्छेदकपुनर्विशेषणीयान्तकमत गुरुधर्मेणापि
साध्यतायां नातिव्याप्तिरित्यत आह नञ्रूपेति ननु घटत्वान्महाकालत्वादित्यादावव्याप्तिरूपं गुरुधर्मेण साध्यत
यामातिव्याप्तिभियापि प्रतियोगिकत्वधर्मतो भयाभावघटितं लक्षणं वाच्यमत आह तत्तदपि दूषयति लघुरूपेत्य
दित्यादिनेत्यपि केचित्। वह्नित्वादिसमनियतं यत्प्रमेयवह्नित्वादिकं तादृशरूपेण साध्यतायां धूमादावव्याप्तिरिति
भावः प्रतियोगितावच्छेदकेति हि हेतु समानाधिकरणाभावप्रतियोगितायां यावदवच्छेदकं तदभाववद्वृत्तित्वस्य प्र
लस्यं प्रतियोगितावच्छेदकत्वेनाविवक्षितत्वादित्यर्थः अथ येन संबंधेन प्रतियोगितावच्छेदकत्वं तेनैव तदभावव
त्तिसाध्यतावच्छेदकघटकसंबंधेनावृत्तित्वं ग्राह्यं तेन धूमादिमन्निष्ठप्रतियोगितावच्छेदकस्य घटत्वादेः कालि
कादिसंबंधेनाभाववत्यात्मादौ वह्नित्वादेः समवायेनावृत्तावपि नोक्तावच्छेदकत्वं नतु वा धूमत्वादेः संयोगादिसं
बंधेन स्वाभाववत्तिसमवेतत्वेप्यवच्छेदकत्वहानिः यच्च साध्यतावच्छेदकघटकेत्वे तेनैव संबंधेन तदभावाग्र
तो

नेनान्वितं तथा विशेतियात्किंचित्पदं व्याप्यवृत्तिस्थलीयलक्षणाभिप्रायेण तथा च तथा विधो हेतुसमानाधिकरणो यत्किं
चिदभावस्तत्प्रतियोगितावच्छिन्नाभाववद्वृत्ति एकधर्मावच्छिन्नप्रतियोगिताथकं चैकपदं अव्याप्यवृत्तिसाध्यकस्थली
यनिरुक्त्यभिप्रायेण तथा विधाया एकधर्मावच्छिन्नाप्रतियोगितात्तत्सामान्यशून्यत्वमिति योजना तत्प्रतियोगिता
या अवच्छेदकीभूतधर्मावच्छिन्नाधारानधिकरणत्वं हेतुमत्स्तत्प्रतियोगितायामवच्छेदकीभूतधर्मावच्छिन्नप्रतियोगिता
शून्यत्वं तत्रार्थः इति वस्तुतस्तु गतिः एकपदं संग्राहितया तत्तदभावप्रवेशार्थमित्तिवुक्तत्वं अतिरिक्तं वचः
तन्निवेशस्यवैयर्थ्यात् यात्किंचित्पदे नैव तल्लाभादिति ध्येयं। यद्यपि प्रमेयवान् वाच्यत्वादौ समवायेन साध्यता
यां व्यभिचारिण्यतिव्याप्तिः प्रमेयत्वावच्छिन्नाभावप्रतियोगितासामान्यशून्यत्वाप्रसिद्धेः तादृशाभावात्तरस्य निरु
क्तप्रतियोगितानवच्छेदकत्तायाः प्रमेयत्वे सत्वात् तथा च तादृशयत्किंचिदेकाभावप्रतियोगितात्वं यद्धर्मव्याप्यत्वाव
च्छेदकं तत्वं विवक्षितं अस्ति च प्रमेयव्यापकत्वं प्रमेयत्वसामान्याभावप्रतियोगितायामित्यदोषः तदवच्छेदकत्वं
अत एवेत्ययत्किंचिदेकाभावव्यक्तेः प्रवेशादेवेत्यर्थः यदि सामान्याभावो नास्ति तदा वह्निमान्तेष्वत धूमाभावप्रति
योगितासामान्यशून्यघटादावच्छेद्याधूमत्वस्यावच्छेदकत्वमिति भावः नन्वक्तादृशप्रतियोगितायामन्यूनानतिरि
क्तवृत्तित्वं वाच्यं वह्नित्वं तु न घटवृत्तित्वादृशप्रतियोगित्वान्यूनवृत्त्य तत आह तावतातेति अतिप्रसंगादिति तथा च व्याप्ति

दीत्या८ सुप	६६ न५

ऽधिकरणीयावत्त्वे वह्निरिति यावत्त्वादिः पर्याप्त्या(त्वादि) वह्नित्वस्यावच्छेदकत्वं द्वयोरमितिवा वस्वपर्याप्त्यवच्छेदकधर्माव
च्छिन्नोपि पर्याप्तिकत्वस्योक्तत्वात् वह्नित्वपर्याप्त्यवच्छेदकीभूततत्तद्वह्नित्वावच्छेदेन यावत्त्वादेः पर्याप्त्युक्तत्वात् नचैवमनति
रिक्तवृत्तित्वोपि शवे रा थ्यं वह्नित्वपर्याप्त्यवच्छेदकधर्मावच्छिन्नपर्याप्तिकं तत्तद्धर्मत्वतत्त्वादिकमादाय वह्नित्वस्यापि पारि
भाषिकावच्छेदकत्वापत्तेरिति भावः यावत्त्वादिकमिति आदिना गुणत्वोभयत्वादिसंग्रहः ननु केनेन्नवह्नित्व प
र्याप्त्यधिकरणपर्याप्तिकमित्यर्थः न च पर्याप्तिः समवायः स च गुणत्वोभयत्वादेः प्रक्षतमेवेत्यत आह पर्याप्तिश्चे
ति अन्यथा एको द्वौ द्वित्ववानित्यादिप्रतीत्योरविशेषप्रसंगादिति भावः न चायमेक इत्यादिप्रतीतिः समवायेनैवोपप
त्तौ एकत्ववह्नित्वादेः पर्याप्तिसंबंधे मानाभावात्तद्रूपेण साध्यतायां व्यभिचारितापत्तिर्व्याप्तिरिति वाच्यं द्वित्वावच्छिन्नेव
ह्नित्वमेकत्वं च पृथ्वीत्यनन्वयाद्द्वित्वादिवद्भवत्वादेरपि तदभ्युपगमादिति भावः व्यासज्यवृत्तित्वं तदन्यत्वान्यतररूपेणैव साम
न्यवृत्तित्वोक्तयापि वह्नित्वादिवारणासंभवे स्वपर्याप्तीत्यादिपर्यंतानुधावनस्य प्रयोजनमाह वह्नित्वादिकमिति तथा च धूम
वान्तिष्ठाभावस्य प्रतियोगितावच्छेदकवह्नि धूमघटोभयत्वस्य व्यासज्यवृत्तितया स्वसमानाधिकरण[illegible]स्य तत्स्यैवानतिरिक्तवृ
त्तित्वं वह्नि धूमोभयत्वस्यापीति तादृप्येण समानवृत्तिकत्वोक्तौ वह्नि धूमोभयवान् धूमादित्यादौ एवं व्याप्तिलक्षणाव्या
प्तिः स्यादिति भावः यद्यपि वित्ता गोत्ताणोभयत्वावच्छिन्नाभावस्य प्रतियोगितावच्छेदकताघटकसंसर्गः पर्याप्तिरेव न तु स

॥२७॥

घ१	छत्तिक ३

लद्भूतितन्नुच्छं धूमत्वप्रकारकप्रमाविशेष्यवान् वह्नेरित्यादावतिव्याप्तिर्लघुतया तादृशप्रमाविशेष्याभावप्रतियोगि
तावच्छेदकीभूतस्य धूमादेः स्वरूपसंबंधेनाभावस्य वतिधूमएव तादृशप्रमाविशेष्यत्वस्य वृत्तेः तद्वद्वृत्तित्वेच
स्वरूपसंबंधेन तद्वृत्तिसाध्यतावच्छेदकताघटकसंबंधेनावर्त्तमानत्वेनातो धूमत्वाभावस्य कालिकसंबंधेनाश्रये धूम
समवायेन स्वरूपसंबंधेन च तदाश्रयस्य दाद्यैकालिकतया धूमत्वस्य वर्त्तमानत्वेप्यवच्छेदकत्वहानिः न च समवाये
न प्रमेयस्य साध्यतायां तादृशावति व्याप्तिः प्रमेयत्वरूपस्यावच्छेदकत्वस्याभावप्रसिद्ध्या प्रमेयाभावस्य लक्षणाघट
कत्वादिति वाच्यं हेतुमन्निष्ठाभावप्रतियोगितावच्छेदकं यद्धर्मान्यूनवृत्तित्वस्यैव विवक्षितत्वात् तत एव सत्ताश्रयस्य साध्य
के तादृशावच्छेदकीभूतस्याभाववति साध्यतावच्छेदकताघटकीभूतसमवायसंबंधेन वृत्तेरप्रसिद्धावपि तादृशत्वादिहे
तौ नातिव्याप्तिः इदं तु चिंत्यं तादृशप्रतियोगितानतिरिक्तवृत्तिभिन्नत्वमुपेत्य न अयद्यया प्रवेशलाघवात्तादृशावच्छेदकं
यावत्तत्तत्प्रमेयकातिरिक्तवृत्तित्वं साध्यतावच्छेदकस्य विशेषणं कर्तुमुचितमिति ॥ ननु धूमवन्निष्ठाभावप्रतियोगिताव
च्छेदकं यद्भाग्यादिनिष्ठं यावत्त्वं तदतिरिक्तप्रमेयवह्नित्वादिकमिति व्याप्तिलक्षणमसंभवतीत्यत आह स्वसमानेति स्व
अनतिरिक्तवृत्तित्वेनाभिमतं तथा च स्वसमानवृत्तिकं यद्धेतुमन्निष्ठाभावप्रतियोगितावच्छेदकं तदनतिरिक्तवृत्तित्वमि
त्यर्थः ननु वह्निनिष्ठाद्देरपि संबंधत्वादिना वह्नित्वादिसमानवृत्तिकत्वमत आह तत्त्वं चेति स्वपर्याप्तीति न च वह्नित्वपर्या

वह्नित्विव ४ यावती ६ नं ५

वसंभवात् घटपटयोर्न घटत्वमिति प्रतीतेः प्रमात्वाद्वारेण तेन व्यासज्यवृत्तिधर्मावच्छिन्नाधिकरणताकस्य प्रतियोगिमत्यपि
तदभावस्य सर्वसम्मतत्वात् न च घटपटोभयवृत्तित्वाभाववत्त्वं घटत्वादावुक्तप्रतीतिविषयः सामान्यघटयोः समवाये
न न घटत्वमित्यादौ सामान्ये घटोभयसमवेतत्वाप्रसिद्ध्या तदभावस्य भानासंभवादिति संप्रदायविदः परे तु तदनतिरि
क्तवृत्तित्वमत्र न तु तदभावमात्रं तथा सति हेतुमन्निष्ठाभावप्रतियोगितावच्छेदकं यद्वह्निधूमोभयत्वं प्रत्येकं तदभाववान
वह्निर्धूमश्चाति तद्रूपान्यवृत्तित्वस्यैव वह्निधूमोभयत्वसत्त्वे तादृशोभयाणां साध्यतायां वह्न्यादिहेतावतिव्याप्त्यापत्तेः किन्तु
तादृशप्रतियोगितावच्छेदकवर्तीया तादृशभेदकूटवद्वृत्तित्वमेव तथा वाच्यं तथा च वह्निमान्धूमादित्यादौ [illegible]व्या
प्तिरेव तादृशावच्छेदकीभूतं यत्तावत्त्वोभयत्वादिकं तद्वतो निखिलवह्नेः प्रत्येकभेदकूटवत्त्वाद्वह्नित्वस्याप्र
वृत्तेः स्वसमानवृत्तिकत्वं द्वयमेव तिष्ठेयं। केचित्तु तावत्त्वोभयं नास्तीत्यादिप्रतीतौ प्रतियोगितावच्छेदकतानि
रूपकः समवाय एव संसर्गो भासते तेन न च पर्याप्तिरिति दण्डिपुरुषत्वाश्रयस्य सत्त्वेऽपि तदवच्छिन्नाभाववत्तादृ
शोभयत्वाश्रयस्य तावत्त्वोभयान्यतरमात्रस्य सत्त्वेऽपि तादृशोभयत्वावच्छिन्नाभावो नाविरुद्धस्तेन तदवच्छिन्नाधिकर
णतया सद्धिमवृत्तेः स्य विरोधादेवं च यथाश्रुतमेव साभागिताऽस्तु चिंत्यं वस्तुतः प्रमेयसाध्यकवाच्यत्वादिहेतावति
व्याप्तेर्वारणार्थमवश्यं प्रतियोगितावच्छेदकानतिरिक्तवृत्तित्वं भस्यस्य हेतुमन्निष्ठाभावप्रतियोगितावच्छेदक

॥१८॥

म२

मवायेन तादृशमात्रसत्त्वेपि तादृशतादृशोभयं नास्तीति प्रतीतेस्तथात्वे च प्रतियोगितावच्छेदकतानिर्वाहकपर्याप्तिसंबंधेन
तादृशोभयत्वाद्यभाववति प्रत्येकवह्नौ वह्नित्वादेरवच्छिन्नत्वादेरवच्छेदकत्वासंभवात् स्वसमानवृत्तिकेति व्यर्थं तथापि
प्रत्येक वह्नौ पर्याप्तिसंबंधेनापि तादृशतादृशोभयत्वादेरभावः किंतु घटादावेवान्यथा तत्संबंधेन प्रत्येकाद्यवृत्तिधर्मस्य तत्संबंधे
न समुदायावृत्तित्वनियमादुभयत्वेनैव प्रत्येकं हित्वाभावसत्त्वादिमौ न द्वावित्यपि प्रतीत्यापत्तेर्नैवं चेवमयं द्वावित्यपि
प्रतीतिः प्रमा स्यादिति एकत्वव्यक्तावपि द्वित्वस्य पर्याप्तिसंबंधेन सत्त्वादिति चिन्त्यं मूलावच्छिन्नं कपिसंयोगी
त्वादिप्रतीतेर्मूलावच्छेद्य समवायेन कपिसंयोगाद्यवगाहित्ववदुक्तप्रतीतेरपीदंत्वाद्यवच्छेद्य पर्याप्तिसं
बंधेनैव द्वित्वाद्यवगाहितया प्रमात्वायोगादेकव्यक्तेरिदंत्वावच्छेद्य पर्याप्तिसंबंधेनैव द्वित्वराहित्यादित्यत एवायं न द्वावित्य
कारप्रतीतिः प्रमात्वमप्युपपद्यते इदंत्वावच्छेद्य पर्याप्तिसंबंधेन यो द्वित्वस्याभावस्तन्निति तदवगाहित्वात् तत्र चेदंत्वावच्छेद्य
पर्याप्त्यप्रसिद्धिरेकत्ववह्नित्वादौ तत्सौलभ्यादेकत्ववह्नित्वादिकं चेदंत्वावच्छिन्नपर्याप्तं न तु द्वित्वादिकमित्यनुभवस्य
सर्वसिद्धत्वात् न त्वेकस्य द्वित्वपर्याप्त्यधिकरणत्वे घटद्वयपृथ्वनोपिगतत्वात्तत्र घटावितिप्रत्ययः प्रमा स्यादिति वाच्यं तद्धर्म
निष्ठेपि घटे घटद्वयत्वावच्छेद्यत्वतद्धर्मवृत्तित्वविरहात्तादृशद्वयत्वावच्छेदेन तद्धर्मवृत्तित्वावगाहिन्याः प्रोक्तप्रतीतेर्भ्र
मत्वादत एव घटेन तद्धर्मतद्धर्मवत्त्वनिष्ठावित्येवधीस्तत्र प्रमा तद्धर्मस्थितस्यापि घटस्य घटद्वयत्वावच्छेदेन तन्निष्ठत्वाभा

प.द्य.ट.त्वी. हि. कि.

सत्तात्वानतिरिक्तवृत्तितया सत्तासाधकजातिमत्त्वादिहेतावव्याप्तिश्चेत्पत्त्र आह वस्तुतस्त्विति तदवच्छिन्नेति हेतुमा
न्निष्ठाभावप्रतियोगितावच्छेदकीभूततद्धर्मावच्छिन्नाभावकूटसंबंधं यद्धर्मविशिष्टसामान्यं तादेव पारिभाषिकमवच्छे
दकमित्यर्थः अत्र तदाश्रयप्रतियोगिकाभावे तूक्तौ तत्तद्दृष्टधूमत्वाश्रयप्रतियोगिकोभयाभावादिमिति प्रमेयधूमत्वा
दिविशिष्टस्य संबंधतयावच्छेदकत्वं तस्यात् किंतु गगनत्वादेरेव तथात्वं स्यादत उक्तं तदवच्छिन्नेति प्रतियोगित्वं
साध्यतावच्छेदकसंबंधेन ग्राह्यं तेनायं घटत्वादित्यादौ हेतुमन्निष्ठाभावप्रतियोगितावच्छेदकं [illegible] संबंध
सामान्येन कालिकसंबंधेन वा तदवच्छिन्नाभाववति गगनादौ घटस्यासंबंधत्वेपि नाव्याप्तिः पर्वतादेरुत्पत्तिकाला
वच्छेदेन संयोगसंबंधावच्छिन्नधूमसामान्याभाववत्त्वात्तत्र च धूमत्वविशिष्टस्यासंबंधत्वात्तदसंबंधस्य विशिष्टसा
मान्यकं गगनत्वादिकमुपादाय धूमवान्वह्नेरित्यादावतिव्याप्तिरतः प्रतियोगिव्यधिकरणत्वेन तदवच्छिन्नाभा
वो विशेष्यः प्रतियोगितावच्छेदकसंबंधेन प्रतियोगितावच्छेदकावच्छिन्नासंबंधी तदवच्छिन्नाभाववान् ग्राह्य इति तु पर्य
वसितार्थस्तेन संयोगसंबंधावच्छिन्नधूमाभावस्य वह्निमवत्पर्वतादौ समवायादिसंबंधेन प्रतियोगिव्यधिकरणत्वे
पि धूमत्वस्यावच्छेदकत्वहानिर्नेवाङ्गं घटत्वादित्यादौ हेतुमन्निष्ठाभावप्रतियोगितावच्छेदकं यद्धर्मयभिन्नं इ

ना१

॥१७॥

यदन्यूनवृत्तित्वमर्थो वाच्यस्तत्र चान्यूनवृत्तित्वं प्रतियोगितावच्छेदकताघटकसंबंधेन बोध्यं वह्निधूमोभयवान् वह्नेरित्याद
वतिव्याप्तेः हेतुमन्निष्ठाभावप्रतियोगितावच्छेदकं यदन्यूनवृत्तिवृत्तित्वमर्थो वाच्यस्तत्र चान्यूनवृत्तित्वं प्रतियोगिता
वच्छेदकताघटकसंबंधेन बोध्यं वह्निधूमोभयवान् वह्नेरित्यादावतिव्याप्तेः हेतुमन्निष्ठाभावप्रतियोगितावच्छेदकं यद्व
ह्निधूमोभयत्वं तस्य तादृशोभयत्वपर्याप्त्यधिकरणं यद्वह्निधूमोभयं तद्वृत्त्येकानिष्ठस्य पर्याप्तिसंबंधावच्छिन्नाभावस्य
प्रतियोगित्वेन तन्न्यूनवृत्तित्वात् किंतु स्वावच्छिन्नप्रतियोगित्वसंबंधेनेव तत्तथात्वं वाच्यं तथा च तादृशोभ
यत्वादेरपि स्वावच्छिन्नप्रतियोगित्वसंबंधेन वह्नित्वाद्यन्यूनवृत्तित्वात् वह्निमान् धूमादित्यादौ वह्नित्वादेरवच्छेदक
त्ववारणार्थमवश्यं स्वसमानवृत्तित्वेनावच्छेदकं विशेषणमिति युक्तमुत्पश्यामः ॥ ननु प्रतियोगितावच्छेदकान
तिरिक्तवृत्तित्वस्य घटत्वं प्रतियोगितावच्छेदकं यादृक्प्रतियोगितानतिरिक्तवृत्तित्वस्वरूपं तदा तादृशोभयत्वा
वच्छिन्नाभावमादाय वह्निमान् धूमादित्यादौ वह्नित्वमपि पारिभाषिकावच्छेदकं स्यादत आह घटकमिति प्रतियोगि
ताव्यधिकरणोभयाभावघटितलक्षणे गुरुरूपेण साध्यतायामव्याप्तिमपाकर्तुमाह एकं चेति ननु धूमत्वमेकस्मिन्नेव
पर्याप्तं ~~मिति~~ द्वित्वादिप्रतीतेः प्रत्येकवृत्तिधर्मावच्छिन्नाधिकरणताकत्वावगाहित्वे बोधपत्तौ धूमत्वादेः पर्याप्तिसंबं
धेनाभाववृत्तिधूमवान् वह्नेरित्यादावतिव्याप्तिः स्वपदेन धूमत्वस्य ग्रहीतुमशक्यत्वादेवसत्तात्वस्य । विशिष्ट

ननु द्वित्वादिकमित्यस्य द्वित्वादि ... मात्र २ ननु प्र धूमत्वा २ त्येकमात्रवृत्तीदं न च घटवृत्तिन्नाधिकरणताकमित्यर्थः संभवात् २

ताघटकसंबंधेन वैशिष्ट्याभिधानात् दोषदोषः पुरुषनिष्ठसंयोगसंबंधेन केवलकालिकसंबंधेनवा दंडवत्त
कालिकविशेषणतया साध्यतायां महाकालत्वादिहेतौ व्याप्त्यापत्तेः गगनत्वादेः पुरुषनिष्ठत्वेन संयो
गादिसंबंधेनावृत्त्या पारिभाषिकावच्छेदकाप्रसिद्धिः न चैवं हेतुमन्निष्ठाभावप्रतियोगितावच्छेदकत्वं याद्द
शसंबंधावच्छिन्नं तेनैव संबंधेन वैशिष्ट्याभिधानात् घटत्वगगनत्वादौ पारिभाषिकावच्छेदकत्वं सुल
भमिति वाच्यं धूमत्वप्रकारकप्रमाविशेष्यवान् वह्निरित्यादौ साध्यतावच्छेदकमपेक्ष्य लघोर्धूमत्वस्यैव स
मवायेन हेतुमन्निष्ठसंयोगसंबंधावच्छिन्नाभावप्रतियोगितया समवायेन धूमत्वप्रमाविशेष्यत्वस्या
वृत्त्या तस्य पारिभाषिकावच्छेदकत्वाभावप्रसंगात् न च साध्यत्वतादृशप्रतियोगित्वयोरन्यतरावच्छेदक
त्वघटकसंबंधेन स्ववैशिष्ट्यवत्त्वविवक्षणात् उक्तव्याप्तौ नातिव्याप्तिः प्रसंग इति वाच्यं तादृशत्वेन धूमव
तः संयोगेन साध्यतापर्याप्त्यधिकरणत्वादावतिव्याप्त्यापत्तेः धूमापेक्षया लघुत्वेन हेतुमन्निष्ठाभावप्रतियोगि
तावच्छेदकं । यद्धूमत्वं तद्वह्निभिन्नाभाववत्प्रतियोगितावच्छेदकता घटकसंबंधेन धूमविशिष्टपरमाणोः
साध्यताघटकसंयोगसंबंधेन संबद्धतया पारिभाषिकावच्छेदकत्वविरहादिति चेदत्राहुः यत्संबंधेन यद्धर्मविशिष्टसामान्य
निरूक्तधर्मावच्छिन्नाभाववत्साध्यतावच्छेदकसंबंधेनासंबद्धं तत्संबंधेन तादृशधर्मावच्छिन्नविशेष्यतामित्ययं तत्साधनं तत्

व्यत्वं प्रतियोग्यनधिकरणो नत्ववच्छिन्नाभावस्य तिग्मुरणादेोऽव्यत्वविशिष्टस्पर्शसत्वेपि अव्याप्तिः वस्तुतो निरुक्तप्रति
योग्यनधिकरणत्वमेव तदवच्छिन्नाभाववत्त्वसाध्यतावच्छेदकसंबंधेन वाच्यं नच प्रतियोगितायास्तत्संबंधावच्छि
न्नत्वं व्याप्यनियामकसंबंधेन साध्यतायास्तत्संबंधावच्छिन्नत्वं प्रतियोगित्वाप्रसिद्ध्या व्याप्तिप्रसंगादितिवाच्यं । न
च घटवान् महाकालत्वादित्यादौ तादृशप्रतियोगितावच्छेदकयद्गुणत्वं तदवच्छिन्नाभावस्य प्रतियोगिवै
यधिकरण्याप्रसिद्ध्याऽव्याप्तिरिति वाच्यं अत्रापि साध्यतावच्छेदकसंबंधसामान्येन तादृशप्रतियोगितावच्छेदका
वच्छिन्नप्रतियोगिताक यद्यद्वृत्तियोगिकत्वोभयाभावस्तत्संबंधत्वस्य विवक्षितत्वात् । तत्संबंधत्वमपि सा
ध्यतावच्छेदकसंबंधेन बोध्यं तेन घटत्वाद्यवच्छिन्नप्रतियोगिताकाभाववति गगनत्वादिविशिष्टस्य यथाक
ना८
थंचित्स्वरूपादिना संबंधत्वेन पारिभाषिकावच्छेदकाप्रसिद्धिनिबंधनो व्याप्तिलक्षणासंभवः धूमवान्व
ह्न्यभावप्रतियोगितावच्छेदकीभूततत्तद्व्यक्तित्वावच्छिन्नाभाववति वह्निविशिष्टस्य तद्वह्नेरसंबंधत्वात्
वह्निमान् धूमादित्यादौ वह्नित्वमप्यवच्छेदकं अतः सामान्यपदं । ननु कालिकादिसंबंधेन गगनत्वादि
विशिष्टघटादितस्यात् तादृशप्रतियोगितावच्छेदकीभूतगगनत्वाद्यवच्छिन्नाभाववति साध्यताघटकसंयोगा
दिसंबंधेन संबंधत्वात् पारिभाषिकाऽवच्छेदकाप्रसिद्ध्या व्याप्तिलक्षणासंभवः नच साध्यतावच्छेदक

वंधेन यद्यद्विशिष्ट संबंधिजातिष्ठाभावप्रतियोगितावच्छेदकत्वेपि न पारिभाषिकावच्छेदकाप्रसिद्धिः अभावश्चात्र प्र
तियोगिव्यधिकरणो बोध्यः तेन घटत्वाद्यवच्छेदकमात्रस्यैव स्वविशिष्टनिष्ठसंयोगसंबंधावच्छिन्नाभावप्रतियोगितावच्छेदक
त्वात् भाँ। पारिभाषिकावच्छेदकाप्रसिद्ध्यावह्निमान् धूमादित्यादौ नाव्याप्तिः प्रतियोगितावच्छेदकसंबंधेन प्रतियोगितावच्छे
दकविशिष्टप्रतियोग्यसंबंधित्वं स्वविशिष्टसंबंधिना विशेषणीयमिति निष्फलितार्थः तेनाभावमात्रस्यैव यथाकथंचि
त्कालिकादिसंबंधेन प्रतियोगिनः संबंधिनि वृत्तावपि न क्षतिः नवा हेतुमन्निष्ठाभावप्रतियोगितावच्छेदकीभूतास्व
विशिष्टसत्तात्वादेः सत्तात्वाद्यवच्छिन्नसंबंधिनिष्ठप्रतियोगितासामान्ये व्यधिकरणाभावप्रतियोगितावच्छेदकत्वे
पि सत्तावान् जातेरित्यादौ नाव्याप्तिः तादृशाभावप्रतियोगित्व साध्यतावच्छेदकसंबंधावच्छिन्नत्वं ग्राह्यं तेन घ
टत्वादेरपि स्वविशिष्टसंबंधिनिष्ठसमवायावच्छिन्नप्रतियोगिव्यधिकरणाभावप्रतियोगितावच्छेदकत्वादेव विशि
ष्टसत्तावान् जातेरित्यादावतिव्याप्त्यभावात् न च संयोगेन घटाभावस्यैव तत्तत्समवायानियतघटविशिष्टवाच्यात्वा
द्यभावत्वात्तत्प्रतियोगित्वावच्छिन्नस्यवा...स्य सर्वत्र सत्वात् प्रतियोगिव्यधिकरणाभावस्यैवाप्रसिद्धिः स्या
द्विप्रतियोगितावच्छेदकावच्छिन्नवैयधिकरण्यप्रवेशेन स्याद्वितिसाच्चायत्प्रतियोगिता विशिष्टस्यानाधिकरणं
• वच्छेदकत्वाद्वह्निमान् धूमादित्यादावव यच्च २ छेदकाप्रसिद्धिर्निर्वंधनो दोषः पूर्ववद्धिहापि साध्यतावच्छेदकसं
वंधेनानिरुक्तप्रतियोगितावच्छेदकस्य स्पत्वादेर्विशिष्टसत्तात्वाद्यवच्छिन्नाभावप्रतियोगिता न ४

वच्छेदकत्ताघटकसंबंधावच्छिन्नविशेष्यत्वं तदवच्छेदकसाध्यतावच्छेदकधर्मवत्वस्यापि वाच्यत्वात् न कोपि दोषः समवाये
नवाह्नित्वावच्छिन्नविशेष्यतायाः स्वरूपादिसंबंधेन गगनत्वाद्यवच्छिन्नविशेष्यताविरहात् भिन्नत्वादेवावच्छेदकाप्रसि
द्धिनिबंधनासंभवस्तु दासादिति नन्वेवमपि विशिष्टसत्तावान् जातेरित्यादावतिव्याप्तिस्तादृशाद्यत्वाद्यभाववति
पि गुणादौ विशिष्टसत्वस्य संबंधत्वात्तादृशाधर्मावच्छिन्नाभाववत्तिषु संबंधित्वानवच्छेदकत्वविवक्षणात् यथा क
थंचिद्वाररोपि सत्तावान् भावत्वादित्यादावतिव्याप्तिः सत्तात्वाद्यवच्छिन्नाभाववतिसामान्यादौ साध्यतावच्छेदकस
मवायसंबंधेन संबंधित्वाप्रसिद्धेः सत्तात्वस्यानिरुक्तावच्छेदकत्वाभावात् न च साध्यतावच्छेदकस्वरूपसंबंधेन सा
मान्ये तद्वावच्छिन्नाभाववत्वनु योगिकत्वयद्धर्मावच्छिन्नप्रतियोगिताकत्वोभयाभावस्तत्वं विवक्षितमतो नोक्तदोष
स्तथा सति प्रमेयधूमवान् वह्नेरित्यादावतिव्याप्त्यापत्तेः प्रमेयधूमत्वघटिततादृशोभयस्य गुरुतया तद्वावच्छिन्नाभा
वाप्रसिद्धेरिति स्वरसेनाह स्वाविशिष्टेति स्वं पारिभाषिकावच्छेदकत्वेनाभिमतं तथा च वह्ने गुरुभानाधिकरणतादृशा
भावप्रतियोगितावच्छेदकं यद्विशिष्टसंबंधि इति ष्ठा भावप्रतियोगितानवच्छेदकं स एव पारिभाषिकावच्छेदकविशेषया
मिति अत्र खविशिष्टसंबंधित्वं साध्यतावच्छेदकसंबंधेन यादृशं तेन प्रतियोगितावच्छेदकमात्रस्यैव पर्याप्त्यां चि त्स

स्वविशिष्टप्रतियोगित्व ८

भावा १

मु ४ धर्म २ भा ८

व प्रतियोगितावच्छेदकत्वेन तादृशासत्तात्वस्य पारिभाषिकावच्छेदकत्वादिति भावः ॥ इदं त्ववधातव्यं अ
त्रापि लक्षणे हेतुमन्निष्ठाभावप्रतियोगितावच्छेदकं यद्यत्संबंधेन यादृशं विशिष्टस्य संबंधिनिष्ठाभावप्रतियोगि
तानवच्छेदकं तत्तत्संबंधेन तादृशधर्मावच्छिन्ना विशेष्यतान्यसाध्यतावच्छेदकता घटकसंसर्गावच्छिन्नाविशेष्यता
वच्छेदकत्वमेव साध्यतावच्छेदकेऽपेक्षणीयं नातः प्रागुक्तदोषाणामवकाशो न वा महानसीयवह्नित्वादेः पारिभाषि
कावच्छेदकतया विशिष्टतदन्यत्वस्य वह्नित्वाद्यावसत्वेपि वह्निमान् धूमादित्यादौ अव्याप्तिर्विशिष्टवह्नित्वाभि
न्नस्यापि वह्नित्वस्य विशिष्टवह्नित्वावच्छिन्नाविशेष्यतान्यविशेष्यतावच्छेदकत्वानपायादिति ॥ ननु घटवान्
महाकालत्वादित्यादावव्याप्तिर्गगनत्वादिविशिष्टस्य कालिकसंबंधेन संबंधाप्रसिद्ध्या पारिभाषिकावच्छेदका
त्वासंभवात्तत्र साध्यतावच्छेदकसंबंधसाधारण्ये मानाभावात् तादृशधर्मावच्छिन्नाभाववद्वृत्तियोगिकत्वाभावस्तत्वं विव
क्षितमतो गगनत्वादेः सुलभमितिवाच्यं तथासति प्रमेयधूमवान् वह्नेरित्यादावतिव्याप्तिरिति तत्त्वात् धूमत्ववि
शिष्टप्रतियोगिकधात्वितादृशोभयत्वापेक्षया प्रमेयधूमत्वविशिष्टप्रतियोगिकत्वधात्वितादृशोभयत्वस्य गु
रुत्वेन तद्वच्छिन्नप्रतियोगित्वाप्रसिद्धेरिति चेदत्र वदंति स्वविशिष्टप्रतियोगित्वानिवेशमापादाय साध्यतावच्छे
दकसंबंधसामान्ये हेतुसामानाधिकरणाभावप्रतियोगितावच्छेदकीभूततत्तद्धर्मावच्छिन्नाभाववद्वृत्तियोगिकत्व

॥ २१ ॥

क २ पी २

हेत्वधिकरणं तत्प्रतियोगितावच्छेदकीभूतधर्मो यद्विशिष्टसंबंधिनिष्ठप्रतियोगिव्यधिकरणाभावप्रतियोगितावच्छे
दकं तत्पारिभाषिकावच्छेदकमित्यस्यानिरूपकत्वात् घटाभावस्य घटत्वविशिष्टवाच्यत्वाभावस्वरूपत्वे पि तस्य घट
त्वावच्छिन्नं यत्प्रतियोगित्वं तदाश्रयव्यधिकरणत्वस्य तत्र सुलभत्वादिति न च तत्रावच्छेदकभेदे पि प्रतियोगितै
क्यं युक्तं घटपटाद्यभावसामान्यकप्रयोगिकत्वादिति चेदत्र प्राचः यत्प्रतियोगिताश्रयानधिकरणं तत्प्रतियोगिता
वच्छेदकेत्यभिधाने वह्निमान्धूमादित्यादावव्याप्तिः स्वरूपसंबंधात्मिकायाः प्रतियोगितायाः प्रतियोगिव्यक्तिभिन्न
त्वाद्वह्नित्वावच्छिन्नाभावीय महानसीयवह्निनिष्ठं यत्प्रतियोगित्वं तदवच्छिन्नानधिकरणं हेतुमत्पर्वतादिनिष्ठवह्निसाम
न्याभावप्रतियोगितावच्छेदकीभूतवह्नित्वादेः स्वविशिष्टसंबंधिनिष्ठनिरुक्तप्रतियोगिव्यधिकरणाभावप्रतियोगि
तानवच्छेदकत्वात् प्रतियोगितावच्छेदकावच्छिन्नवैयधिकरण्यप्रवेशे तु तादृशप्रतियोगितायाश्चावच्छेदकं यद्वा
त्वादिकं तदवच्छिन्नानधिकरणत्वं न हेतुमतः पर्वतादेरित्यदोषः इत्याहुः परे तु प्रतियोगिताभेदे येकधर्मावच्छि
न्न प्रतियोगिता लाघवादेकैवेति मते वह्निमान्धूमादित्यादौ नाव्याप्तिः परं तु तद्रूपान्यत्वविशिष्टसत्तावान् रूपत्वादि
त्यादावतिव्याप्तिरेव स्यात् यादृशप्रतियोगितावच्छेदकावच्छिन्नव्यधिकरणाभावो मौलो न स्यात् प्रतियोग्यनधिकरण
हेतुमन्निष्ठाभावप्रतियोगितावच्छेदकस्य घटत्वादेः सर्वस्यैव तद्रूपान्यत्वविशिष्टसत्तात्वावच्छिन्नसंबंधिनिष्ठाभा

त्वविरहादिति वाच्यं धूमगगनाभावान्यतरत्वस्याखंडस्य धूमत्वतुल्यतयात्तस्येव हेतुमन्निष्ठाभावप्रतियोगितावच्छेदकत्व
स्य प्रतियोगिव्यधिकरणाभावप्रतियोगितानवच्छेदकतया पारिभाषिकावच्छेदकत्वेनातिव्याप्तिविरहादिति प्राञ्चस्तच्चिं
त्यं। रूपवान् घटत्वादित्यादावव्याप्तिप्रसंगात् हेतुसमानाधिकरणाभावप्रतियोगितावच्छेदकं यद्रूपत्वद्रव्यत्वान्यतरत्वं
तस्य रूपत्वविशिष्टसंबंधिनिष्ठतादृशसंबंधावच्छिन्नप्रतियोगिव्यधिकरणाभावप्रतियोगितावच्छेदकत्वेन रूपत्वस्या
पि पारिभाषिकावच्छेदकत्वात् तथाहि तादात्म्यसमवायान्यतरसंबंधेन यद्रूपविशिष्टसंबंधिरूपी [illegible] पृथिव्यादिकं वा
तत्र तादात्म्येन समवायान्यतरसंबंधेन प्रतियोगिव्यधिकरणो न रूपत्वद्रव्यत्वान्यतरत्वावच्छिन्नाभावः समवायेन रू
पे रूपत्वादृप्रतियोगिनस्तादात्म्येन च पृथिव्यादेर्द्रव्यात्मकप्रतियोगिनस्तादात्म्येन पृथिव्यादौ द्रव्यात्मकप्र
तियोगिनः संबंधत्वात् किंतु विशिष्टस्य तथाविधसंबंधिनिष्ठप्रत्ययाभाव एव तादृशप्रतियोगिव्यधिकरणस्तु रूपत्व
द्रव्य[illegible]न्यतरत्वेन तत्प्रतियोगितानवच्छेदकत्वमेवेति न च हेतुसमानाधिकरणाभावस्यापि तादृशान्यतरसंबंधेन
प्रतियोगिवैयधिकरण्यस्य वक्तव्यत्वान्नैष दोषः तथा सति समवायेन घटत्वस्य प्रमेयस्य वा साध्यत्वे तादात्म्येन
हेतौ घटत्वे प्रमेये वातिव्याप्तिप्रसंगादिति दिक्॥ अत एवेति वक्तव्यत्वात् त्वादिकल्पस्याकृतत्वादिति वेत्यर्थः यथा
कृतस्यावच्छेदकानतिरिक्तवृत्तित्वस्यादरेऽपि सत्तावान् जातेरित्यादावव्याप्तिः स्यादेवेति भावः जातिमन्निष्ठाभा

तु८ क१ दूप दित्यार्थे न८ गिव्य५ न्याद्द

स्य यद्धर्मविशिष्टप्रतियोगिकव्यक्तीनां प्रत्येकस्य च द्वयोर्व्यतिरेकः स धर्मः पारिभाषिकावच्छेदकः प्रमेयधूम
त्वावच्छिन्नप्रतियोगिकत्वघटितोभयत्वस्य गुरुतया प्रतियोगितानवच्छेदकत्वेपि तत्तद्धूमप्रतियोगिकत्वघ
टितोभयाभावकूटमादायैव नातिव्याप्तिः कालो घटवान् महाकालत्वादित्यादौ च गगनत्वमेव तादृ
शावच्छेदकत्वमादाय लक्षणसमन्वय इति केचित्तु तादात्म्येन साध्यता घटकान्यतरसंबंधेन यत्त
स्य विशिष्टसंबंधी तन्निष्ठो[illegible]य स्तदन्यतरसंबंधेन प्रतियो[illegible]धिकरणो भावस्तत्प्रतियोगितानवच्छेदक
त्वं वा व्यक्तं लक्षणार्थस्तथा च तादृशान्यतरवा[illegible]दात्म्यसंबंधेन गगनत्वविशिष्टस्य संबंधि[illegible]काशे वर्त्तमानोपि
गगनस्याभावो न तादृशान्यतरसंबंधेन प्रतियोग्यधिकरणस्तस्य तादात्म्येन प्रतियोगिसमानाधिकरणत्वात्।
किं च घटत्वाभाव एव तथेति प्रवर्त्तते नि तत्तत्प्रतियोगितावच्छेदकमेव हेतुमन्निष्ठाभावप्रतियोगितावच्छेदकीभूत
गगनत्वमिति तभाद्राशैव कालो घटवान् महाकालत्वादौ संगतिरित्थं चेद्धूमगगनाभावान्यतरयोः संयोगेन साध्यतायां
वह्न्यादावतिव्याप्तिः तादृशान्यतरत्वापेक्षया लघुत्वेन धूमत्वस्यैव वह्निसमानाधिकरणाभावप्रतियोगितावच्छेदकत्वात्त
स्य च संयोगतादात्म्यान्यतरसंबंधेन यस्तदन्यतरत्वविशिष्टसंबंधी गगनाभावस्तन्निष्ठस्य तादात्म्ये संयोगान्यतरसं
बंधेन प्रतियोग्यधिकरणस्य धूमाभावस्य प्रतियोगितावच्छेदकतया धूमगगनाभावान्यतरत्वस्य पारिभाषिकावच्छेदक

ह ५

त ४

वछेद्यत्वसंयोगसंबंधावछिन्नत्वोभयत्वावछिन्नाभावाप्रसिद्धेर्वनातिव्याप्तिर्गचित्तरासभवेत्वावछेद्यत्वमात्रघटितता
दृशोभयत्वस्यैवघटत्वेन प्रतियोगितावछेदकत्वादिति विभाव्यत्ततदोक्तरीत्या वह्निमान्धूमादित्यादावव्याप्तिवार
णार्थमेव साध्यतावछेदकसंबंधेन स्वविशिष्टस्य संबंधित्वं निवेशं पूर्थ्वं च निरुक्तप्रतियोग्यनधिकरणहेतुमन्नि
ष्ठाभावप्रतियोगितासामान्य एव साध्यवन्निष्ठाभावीयसंयोगसंबंधावछिन्नप्रतियोगितानवछेदकीभूतगौरा
घवछिन्नसंयोगसंबंधावछेद्यत्वोभयाभावस्य सत्वाद्रूमवानवह्नेरित्यत्रैवातिव्याप्तिर्गुरुत्वयोक्तक्रमेणता
दृशोभयत्वावछिन्नाभावाप्रसिद्धावह्निमान्धूमादित्यादावव्याप्तिरीस्यादतः प्रतियोग्यसंबंधित्वेनापि स्वविशिष्टसं
बंधीविशेषणीयस्तदर्थः प्रतियोगितावछेदकसंबंधेन प्रतियोगितावछेदकावछिन्नासंबंधित्वं तेन संबंधसामान्येयत्प्रति
योगितावछेदकावछिन्नासंबंधी वह्निविशिष्टस्यासंबंधी पर्वतादिस्तन्निष्ठस्य प्रलयोत्पन्नकर्मात्यंताभावस्य प्रतियो
गितानवछेदकं यद्घटत्वादिकं तदवछेद्यत्वसंयोगसंबंधावछेद्यत्वयोः साधनवन्निष्ठाभावप्रतियोगितायां सत्वेपि
वह्निमान्धूमादित्यादौ नाव्याप्तिर्नवा प्रतियोग्यसंबंधी साध्यवन्निष्ठाभावप्रतियोगितानवछेदकीभूताविशिष्टसत्ता
त्वाघवछेद्यत्वसमवायसंबंधावछेद्यत्वयोः साधनवन्निष्ठाभावप्रतियोगितायां सत्वेपि वह्निमान [illegible] व्याप्ति
(नेवाप्रतियोग्यसंबंधीसाध्यवन्निष्ठाभावप्रतियोगितानवछेदकीभूताविशिष्टसत्तात्वाघव [illegible] संबंधी)

॥२८॥

त८ नवछे इका८ त्वा७

वप्रतियोगितायां सत्तात्वेन्यूनवृत्ति विशिष्टसत्तात्वावच्छेद्यत्वसमवायसंबंधावच्छेद्यत्वोभयसत्वात्स्वच्छेद्यताघटितेष्टत्वास्या
पि प्रागुक्तस्य सत्तावान् जातेरित्यादावव्याप्तिः स्यादेवेति भावः जातिमन्निष्ठाभावप्रतियोगितायां सत्तात्व॰ इति
विशिष्टसत्तात्वावच्छेद्यत्वसमवायसंबंधावच्छेद्यत्वोभयसत्वात्स्वच्छेद्यताघटितलक्षणस्यापि प्रागुक्तस्य सत्तावान्
जातेरित्यादावव्याप्तिरतः तदपि परिष्करोति एवमिति स्वसाध्यतावच्छेदकं यत् स्वत्ववैशिष्ट्यं साध्यतावच्छेदकता
[illegible] संबंधेन वोध्यं तेन धूमत्वादीनां कालिकसंबंधेन धूमत्वादिविशिष्टस्य घटादेः संयोगिनि वृत्तेर्मा तस्या
भावस्य प्रतियोगितावच्छेदकत्वेपि [illegible] धूमवान् वह्नेरित्यादौ नातिव्याप्तिः स्वविशिष्टसंबंधित्वं च सा
ध्यतावच्छेदकसंबंधेन वोध्यं तेन धूमत्वाद्यवच्छिन्नप्रतियोगितायां कालिकसंबंधेन धूमादिविशिष्टस्य यत्संबं
धिर्वह्निनिष्ठाभावप्रतियोगितावच्छेदकत्वविरहेपि नातिव्याप्तिः प्रसंगः न च सामान्यतो धूमसंबंधिनि संयोगेन सर्वस्ये
वाभावसत्वाद्धूमवन्निष्ठाभावो संयोगसंबंधावच्छिन्नप्रतियोगितानवच्छेदकाप्रसिद्धौ कथमतिव्याप्तिरिति वाच्यं गो
त्वत्वघटत्वत्वादावेव तत्प्रसिद्धेः संयोगसंबंधावच्छिन्नगोत्वाद्यभावप्रतियोगितायां लाघवेन गवेतरासमवे
तत्वासमवेतत्वादेरेवावच्छेदात् न चैवमपि तदवच्छेद्यताप्रसिद्ध्यैव नातिव्याप्तिर्गोत्वादिभेदप्रतियोगितायास्त
त्वोपलभ्यान्नाहि सापि गवेतरासमवेतत्वमात्रावच्छिन्ना गोरूपादौ गोत्वभेदासत्वप्रसंगात् यदि च गोत्वाद्य

न्निष्ठाभावप्रतियोगितासामान्ये यत्संबंधावच्छिन्नत्व यद्धर्मावच्छिन्नत्वोभयाभावघटितत्वेन भावत्तव्याप्त्यादेः ल्पस्यापि किंचि
त्करत्वात्तदित्याह यत्र सद्धेतुविशेषद्भूतिनव्यमतमुपन्यस्यति गौरवेति यादृशप्रतीत्या गुरोरवच्छेदकत्वासिद्धेरिति हृ
शबुद्धौ गौरवज्ञानस्य यादृशविरोधित्वं स्यात्तदा प्रमाणाभावाद्गुरोरवच्छेदकत्वं न चेद[illegible]स्तीति भावः यद्यपि गौरवस्य
ज्ञानमात्रं नावच्छेदकत्वधीप्रतिबंधकं विशिष्टसत्तात्वस्य द्रव्य[illegible]त्वापेक्षया गुरुत्वग्रहेपि विशिष्टसत्ता नास्तीति प्र
तीत्या तदवच्छेदकत्वग्रहस्य प्राचीनैरपि स्वीकारान्न च तद्धर्मसमानाधिकरणधर्मधर्मिकस्तदपेक्षया लघुग्रहस्तद्ध
र्मस्यावच्छेदकत्वधीप्रतिबंधकः नीलधूमत्वस[illegible]मानाधिकरणे धूमत्वे तदपेक्षया लघुत्वग्रहेपि (विशिष्टस्य) नील
धूमो नास्तीति प्रतीत्या नीलधूमत्वावच्छेदकत्वावगाहनस्य सर्वसम्मतत्वान्नापि तद्धर्मसमनियतधर्मिक एव तद्धर्मापेक्ष
या लघुत्वग्रहस्तद्धर्मावच्छेदकत्वधीप्रतिबंधकद्भूतिसाम्प्रतं घटज्ञानत्वापेक्षया लघुनोपि ज्ञानस्य घटज्ञानत्वसमनि
यतत्वाभावाद्गुरुणोपि घट[illegible]ज्ञानस्य संयोगसंबंधावच्छिन्नघटज्ञानाभावप्रतियोगितापत्तेस्तथापि संसर्गमर्यादा
या प्रतियोगितावच्छेदकत्वस्याग्रह प्रतिता तादात्म्येन कंबुग्रीवादिमत्वरूपस्तद्गुरु[illegible]र्मः प्रतिबंधकद्भूतिकत्वापि नतै
ध्रुवच्छेदकत्वग्रहद्भूतिप्राचां तात्पर्यविषयस्ततः संसर्गविधया कंबुग्रीवाद्यवच्छेद्यत्वप्रतियोगित्वावगाहिज्ञानप्र
त्ति समानविशेष्यत्वप्रत्यासत्त्या कंबुग्रीवाद्यपेक्षया लघुधर्म[illegible]प्रतियोगिताकत्वज्ञानत्वेनैव प्रतिबंधकत्वं प्राचांम
भिप्रेतं तथा च जलादौ निर्वह्नित्वस्याग्रहदशायां वह्नि[illegible]त्तक्रमेण गौरवस्याग्रहदशायां अपि

त८ पत्रा२ त१ २८

वह्नि ल २ धे४

प्रामाण्यवा १

च्छिन्ना यद्धर्मेति यत्पदं साध्यतावच्छेदकपरं तत्संबंधावच्छिन्नेनेति विशेषणताविशेषावच्छिन्नेत्यर्थः अत्र प्रतिपदं व्यावृत्ति रू
तादिशावोध्यानचनिरुक्तप्रतियोगितासामान्ये यद्धर्मविशिष्टसंबंधिनिष्ठाभावीयविशेषणताविशेषावच्छिन्नप्रतियोगि
तावच्छेदकोवच्छिन्नत्वं साध्यते तद्धर्मावच्छिन्नसामानाधिकरण्यमेव लाघवाद्व्याप्तिरुचितेति वाच्यं सामान्यपदस्य व्याप
कतावच्छिन्नत्वेन निरुक्तप्रतियोगितात्वव्यापकतावच्छेदकं यद्धर्मावच्छिन्नो विशेषणताविशेषावच्छिन्नाभावप्रतियोगिता
वच्छेदकावच्छेद्यत्वमित्यर्थपर्यवसाने न प्रमेयधूमवान्वह्नेरित्यादावतिव्याप्त्यापत्तेः प्रमेयधूमवन्निष्ठाभावप्रतियोगि
तावच्छेदकावच्छेद्यत्वस्य गुरुधर्मधर्मतया वह्निमन्निष्ठाभावप्रतियोगितात्ववन्निष्ठाभावप्रतियोगितानवच्छेदकत्वे
नतादृशप्रतियोगितात्वव्यापकतावच्छेदकत्वादसात्कंबुप्रमेयधूमत्वावच्छिन्नवन्निष्ठाभावप्रतियोगितानवच्छेदकं
यदर्थः पिंडभेदत्वं तदवच्छेद्याभावस्यैव साध्यवन्निष्ठाभावप्रतियोगितात्वव्यापकत्वाभावेति व्याप्त्यसंभवात् एतेन सा
धन [illegible] वन्निष्ठाभावसामान्ये यद्धर्मावच्छिन्नसमानाधिकरणत्ववत्ता तन्निष्ठाभावप्रतियोगितासामा
न्ये वा यद्धर्मावच्छिन्नसामानाधिकरण्याभावप्रतियोगितात्वं साध्यनेतद्धर्मावच्छिन्नसामानाधिकरण्यमेव व्याप्तिर्ला
घवादित्यपि प्रागुक्तक्रमेणेति ध्येयं साध्यभेदेन व्याप्तेर्विभिन्नतया प्रमेयवान्वह्नित्वादिना गुरुधर्मेण साध्यतास्थले एवं साध्यता
वच्छेदकावच्छेद्यत्वाप्रसिद्ध्या प्रागुक्तक्रमेणाव्याप्तिर्वाच्या वह्निमान्धूमादित्यादौ गुरुधर्मेण साध्यतास्थले हेतुम

संबंधिनिष्ठा
भावीय प

हृ क१

ष्टन्यत्तायत्काभावस्तन्यत्तायाघटवत्त्वभावात् तादृशशाब्दाप्रमाणं न स्यादित्यर्थः ननु भ्रमत्वस्य प्रकारभेदेनाभिन्नत्वा-
त् सर्वत्र तत्त्वरसवाह्निशेषकत्वं ननु भ्रमत्वघटकं समवायेन गगनादिभ्रमान्तिविशेषवैयर्थ्यात् तथा च तत्रैव
प्रकृतेपि कम्बुग्रीवादिमत्प्रतियोगिकाभावप्रकारतामात्रेण तादृशान्वयबाधो भ्रमो भाविष्यत्यत आह प्रमाणं चेति
तथा च तत्रापि कम्बुग्रीवादिमान्नास्तीति शाब्दप्रमाणं न स्यादित्याकाभेनापि प्रयुक्ते भ्रमत्वं तदभाववद्विशेष्यकत्वघ
टितं वाच्यमिति भावः धूमो वह्निव्याप्य इत्यादिना नञो वह्निव्याप्यभावकूटात्मकत्वात् कम्बुग्रीवादिमान्नास्तीत्यादि
नञोपि कम्बुग्रीवादिमत्प्रतियोगिकाभावकूटबोधकत्वात् तादृशशाब्दस्याप्रामाण्यानुपपत्तिरन्यथा धूमा
लोकसाधारणत्वानगतव्याप्तेरन्यतावादालोकमभेव्याप्तिवावह्नेर्नावच्छिन्नाभावस्य धूमे सत्त्वात्तमादाय
धूमो न वह्निव्याप्य इत्यादिवाक्यस्य प्रामाण्यापत्तेः एवं गुरुधर्मस्यानवच्छेदकत्वेन तादृशधर्मावच्छिन्नस्यावि
शिष्टबुद्धिं प्रति तादृशधर्माश्रयप्रतियोगिकाभावकूटवत्तानिश्चयत्वेनैवानन्यगत्या वह्निविरोधित्वकल्प
नात् कम्बुग्रीवादिमान्नास्तीत्याविप्रतीतिदशायां कम्बुग्रीवादिमान्नास्तीतिज्ञानविरोधोपि स्युघट एवेति प्राची
न मतानिगर्वः [illegible] गुरुधर्मस्यानवच्छेदकत्वे चान्तरापि दुर्वचत्वमित्याह नचेदेवामीति लाघवप्रतिबन्ध गुरुणा
द्विशिष्टसत्त्वाद्विवादोऽव्यवसमानियतागुणवत्त्वविशिष्टसत्त्वादीनामित्यर्थः अव्याप्तिमुपपादयति गुरुणादीति

कंबुग्रीवादिमत्वादिमत्वावच्छिन्नप्रतियोगिताकत्वेनापि तादृशग्रहो जायत एवान्यथा कंबुग्रीवादिमत्वावच्छिन्न
स्य विशिष्टबुद्धौ भेदावच्छिन्नप्रतियोगिताकत्वेनैवाभावानिश्चयस्य प्रतिबंधकत्वादिति ध्येयं । प्रतीतेर्वलमवच्छेदकत्वा
वगाहित्वं गुरुरपीति तथा च स्वरूपसंबंधरूपावच्छेदकत्वघटितं मूलोक्तं यथाश्रुतमेव व्याप्तिलक्षणं सम्यक प्रमेय
धूमत्वादेरपि तादृशावच्छेदकत्वेन व्यभिचारिण्यतिव्याप्तिविरहादिति कृतं पारिभाषिकावच्छेदकत्वनिर्वचनेनेति भा
वः । ननु तत्क्रमेण गोत्वस्य तस्याविरोधित्वात्तादृशप्रतीत्यावच्छेदकत्वं नावगाह्यते परं कम्बुग्रीवादिमान्नेति प्रति
योगिताकाभावाः इत्याशंकायां निषेधात्तिनचोतिअवलंबनं विषयः तथापि प्रतीतिकं कंबुग्रीवादिमत्वाश्रयेत्यर्थः ता
दृशप्रतीतिः कंबुग्रीवादिमान्नास्तीत्याकारप्रतीतिः अनुदयादिति तथा च त्वन्मते कंबुग्रीवादिमदंतरस्याभावमा
दाय तत्तदुभयप्रसंग इति भावः । ननु तथापि विषयतां किं विषयकनिर्णयस्य प्रतिबंधकोऽन्यथा विशेषादर्शनदशायां त
त्रापि कंबुग्रीवादिमान्नास्तीति प्रतीतेर्जायत एवेत्यत आह तत एवेति गुरुत्वमस्यावच्छेदकत्वादेवेत्यर्थः नप्रमाणमि
ति कंबुग्रीवादिमत्वावच्छिन्नप्रतियोगिताकाभावस्य कंबुग्रीवादिमत्वावच्छिन्नप्रतियोगिताकाभावप्रकारकत्वे
न तादृशान्वयबोधे भ्रमत्वमिति तादृशशब्दस्य भ्रमजनकत्वेनाप्रमाणत्वं तन्मते च कम्बुग्रीवादिमत्प्रतियोगिकाभाव

२८

न६

ननुहेतुमन्निष्ठाभावप्रतियोगितावच्छेदकव्यक्तीनांतत्तद्व्यक्तित्वेनाभावकूटवत्त्वमेवसाध्यतावच्छेदकांशेनिवेश्यम
तोनोक्तदोषइतिचेत्आहतत्तदितियद्यपिगुरोरवच्छेदकत्वेपिपक्षेपिस्वस्वप्रतियोगिव्यधिकरणाभावघटित
व्याप्तेस्तत्प्रतियोगिताव्यक्तिगर्भत्वेनदुर्ज्ञेयत्वंतथापिव्याप्यवृत्तिसाध्यकस्थलीयव्याप्त्यभिप्रायेणेदंतत्रप्रति
योगिवैयधिकरण्याप्रवेशात्केवलाधिकरणेनिरवच्छिन्नवृत्ति[illegible]काभावप्रतियोगितानवच्छेदकत्वमेवसर्व
त्रव्याप्तिशरीरेप्रविष्टमित्याशयेनेदमभिहितंपरमार्थस्तुतेनव्याप्यवृत्तिसाध्यकस्थलेपिव्याप्तेर्न्नदुर्ज्ञेयत्वमितिज्ञेयं
।इ[illegible]द्वन्निष्ठाभावप्रतियोगितावच्छेदकत्वापेक्षयाऽव्यत्वावच्छिन्नवन्निष्ठाभावप्रतियोगितानवच्छेदक
त्व[illegible]स्यगुरुतयातदवच्छिन्नाभावाप्रसिद्धेरितिभावः।ननुहेतुमन्निष्ठाभावप्रतियोगिता
वच्छेदकीभूतयाकिंचिद्धर्मावच्छिन्नाभाववदसंबंधत्वविशिष्टकसामान्यकाभिन्नत्वंस्वविशिष्टसंबंधानिष्ठा
भावप्रतियोगितानवच्छेदकीभूततादृशधर्मकाभिन्नंवायत्साध्यतावच्छेदकंतदवच्छिन्नसामानाधिकरण्यं
व्याप्तिरित्यत्रहेतुमन्निष्ठाभावीयविशेषणताविशेषावच्छिन्नप्रतियोगितासामान्येवा
यद्धर्मविशिष्टसंबंधनिष्ठाभावीयतादृशप्रतियोगितानवच्छेदकावच्छेद्यत्वंनास्तितद्धर्मावच्छिन्नसामानाधिकरण्यंव्याप्ति
रित्यत्रहेतुमन्निष्ठाभावीयवादुर्ज्ञेयत्वाभावात्तथैवव्याप्तिघटितत्वादित्यतआहउपलक्षणमितिनिरुक्तत्वादीतिआदिना

व्यापकतापर्यवसन्नस्य तत्तदवच्छेदकत्वाभावगर्भसामान्यलक्षणस्योपग्रहः यंक्षंतत एव गुरोरवच्छेदकत्वादिवसंगच्छतइति अन्यथा ग्राह्य गंधत्वापेक्षया गुरुत्वेन घ्राणग्राह्यगुणत्वावच्छिन्नाभावाप्रसिद्ध्या तद्धर्मत्वरूपं व्यभिचारित्वं तत्र न स्यादितिभावः ॥ ० ॥ इत्यवच्छेदकत्वलक्षणोटिप्पनी संपूर्णतां गमवत्ती ॥ ० ॥ ननु व्याप्तिनिरूपणप्रस्तावे सामान्याभावव्यवस्थापनमर्थान्तरग्रहस्तामित्युपोद्घातसंगत्यातद्ववतारयतिनान्वेति । अत्र तत्तद्वह्नित्वावच्छिन्नप्रतियोगिताभाववह्नित्वावच्छिन्नप्रतियोगिताकोनवेतिविप्रतिपत्तिः पूर्वपक्षवादिना वह्नित्वस्यावच्छेदकत्वत एवेत्यादिनानचोक्तापूर्वोक्तं तदवच्छिन्नाभावस्य हेतुसमानाधिकरणस्यप्रकाशितत्वविशेषाभावीयतत्तद्वह्नित्वावच्छिन्नप्रतियोगिकत्वान्यव वह्नित्वावच्छिन्नान्येषनचुसामान्यधर्मावच्छिन्नप्रतियोगित्वांतरं सामान्याभावद्ववतत्राप्यतिरिक्तेमानाभावादित्याशयेनाह तत्र चेतिमहानसाद्यवच्छेदेनचतत्तद्वह्न्यभावानांतत्तत्प्रतियोगितावच्छेदकीभूततत्तद्वह्नित्वावच्छिन्नवैयधिकरण्यंतान्निरूपिकायाः तत्तद्वह्नित्वावच्छिन्नप्रतियोगितायास्तदवच्छेदकामेववह्नित्वमितित्रयर्थः तथा च ताद्दशप्रतियोगितायाअवच्छेदकीभूतयात्किंचिद्धर्मावच्छिन्नानधिकरणांत्वेखधिकरणं ताद्दशप्रतियोगितावच्छे[illegible] याअवच्छेदकीभूतयात्किंचिद्धर्मावच्छिन्नानधिकरणंताद्दशप्रतियोगितानवच्छेदकगर्भलक्षणमसम्यक्‌न चयाद्दशप्रतियोगितावच्छेदकीभूतयद्धर्मावच्छिन्नानधिकरणत्वेखाधिकरणंताद्दशप्रतियोगितावच्छेदकतत्‌त्रत्रयद्यपिसाध्यव्यापकतावच्छेदकधर्मावच्छिन्नाभाववद्वृत्तित्वमेवव्यभिचारः सचप्राक्‌गीधत्वावच्छिन्नाभाववद्वृत्तित्वेनैवसत्वस्तुलभद्दत्यपिशक्यतेवक्तुं तथापितद्धेतुः प्रकृतसाध्यकानुमितिविरोधितयाहेत्वाभासभानस्यताद्दशविरोधिविषयत्वेनयाद्दशानुमानविनोधित्वेनस्येवात्र तथात्वादितिभावः ॥१८

न ६

द्धर्मभिन्नत्वं साध्यतावच्छेदके निवेश्यमिति वाच्यं तथा सति हेत्वधिकरणे यद्धर्मावच्छिन्नावच्छिन्नानधिकरणं तद्धर्म
भिन्नसाध्यतावच्छेदके तदुक्तेरेव सम्यक्त्वावच्छेदकांतवैयर्थ्यादिति भावः। अव्याप्तिरिति यद्यपि तत्तद्व्यक्तित्वत्व
विशिष्टद्रव्यत्वाभावकूटस्यैव द्रव्यत्वत्वावच्छिन्नाभावत्वात् द्रव्यं पृथिवीत्वादित्यादावप्युक्तलक्षणासत्वाद
संभवदुक्तरैव वक्तुमुचितं वाच्यं ज्ञेयत्वादित्यादावेव संभवादव्याप्तिरित्युक्तं क्वचिदपि वाच्यत्वं नास्तीत्यप्रतीत्या स्व
रूपसंबंधावच्छिन्नतत्तद्व्यक्तिवृत्तित्वविशिष्टवाच्यत्वाभावकूटस्य प्रतियोगितासु वाच्यत्वत्वावच्छेद्यत्वानुपगमादिति
भावः नन्वु यादृशप्रतियोगितावच्छेदकावच्छिन्नसामान्यानधिकरणं हेत्वधिकरणं तादृशप्रतियोगितावच्छेदक
त्वं वाच्यं तथा च धूमवतस्तत्तद्वह्नित्वावच्छिन्नानधिकरणत्वेपि वह्नित्वावच्छिन्नाधिकरणत्वान्नाव्याप्तिर्नोव्याप्ति
रित्याशंक्य निराचष्टे न चैवमिति एवं विशेषधर्मावच्छिन्नप्रतियोगित्वस्यैव सामान्यधर्मावच्छिन्नत्वे तद्वृत्तित्वाद्धूमवद्वृ
त्तित्वात् न तथात्वं न तद्वह्न्यभावस्य प्रतियोगि[illegible]त्वं क्वचिदिति क्वचिद्वृत्तिर्य[illegible]धूमाभावस्तत्प्रतियोगितावच्छे
दकं यद्धूमादावृत्तित्वं तदवच्छिन्नस्य तत्र गोदेरित्यर्थः अतिव्याप्तीति यद्यपि प्रागुक्तक्रमेण प्रतियोगिव्यधिकरणाभाव
स्यैव प्रसिद्ध्या धूमवान्वह्नेरित्यादौ नातिव्याप्तिस्तथापि[illegible]व तत्तदधिकरणवृत्तित्वस्य स्वरूपस्य प्रतियोगितावच्छेद
कत्वप्रसिद्धौ धूमवान्वह्नेरित्यादौ नातिव्याप्तिर्न्नाव मा[illegible]

कधर्मावच्छिन्नसमानाधिकरणत्वात् तथापि तत्तदभावप्रतियोगितावच्छेदको[illegible]वाच्छिन्नाधिकरणस्यापि ता

यधिकरणा४ ँ स्याः२ तत्त४ न१
यत्किंचिद्धर्मा १

नप

तृष्णावच्छेदकावच्छिन्नवत्तापत्तिरूत्याप्तिप्रसंग एवातिव्याप्तिपदेन विवक्षितस्तथाच प्रतियोगिव्यधिकरणाभावाप्रसि
द्ध्याद्व्यवान्वह्नेरित्यादावति व्याप्तिरिति भावः शंकते अथेति तथाच प्रतियोगिवैयधिकरण्याप्रसिद्धिर्निरिंधनो ना
व्याप्तिरिति भावः शंकांतिरस्यति अवच्छेदकमेव अनुगतरूपं प्रतियोगितामात्रस्यैव तत्र्यनवच्छेदकमित्यर्थः क्वचिदेव
ह्निर्नास्तीत्यादिप्रतीते र्वह्निप्रतियोगिकात्यंताभावकूटमात्रावगाहित्वेनाप्युपपत्तेरिति भावः ननु विशेषा
भावीयप्रतियोगितावच्छेदकत्वेप्यतिरिक्तसामान्याभावस्यैव प्रतियोगितावच्छेदकोऽनुगतधर्मत्वस्यादि
त्यत आह अभावांतरेणेति ननु माभूदनुगतधर्मः प्रतियोगितामात्रस्यावच्छेदकस्ततः किमत आह हितथाचेति
तद्रूपेति अनुगतधूमत्वाद्यवच्छिन्नसाध्यकत्वं क्वाद्यादावित्यर्थः प्रत्यक्षविषयाप्रमाणसंशयत्वप्रयुक्तस्याविशेषाभाववि
षयस्याचानुसरणावैयर्थ्यापत्तिरात्त्वसंशयात्प्रथेति तथाच वायू रूपवान्नवेत्याकारः संदेहः तत्तद्रूपाभावा ति
रिक्ताभावप्रकारकस्तत्तद्रूपाभावनिश्चयोत्तरकालीनाभावसंशयत्वादिति व्यतिरेक्यनुमानमेव सामान्याभा
वे मानं अत्र च क्रमिकातत्तद्रूपाभावानिर्णये व्यभिचारवारणार्थं हेतौ संशयानुसरणं घटाभावादिप्रकारकत्वेन
पक्षविशेषणत्वाच्च न [illegible]सिद्धसाधनमर्थांतरं वेति भावः अयमिति वायो रूपं नवेत्यभिलापमानदूत्यर्थः
तस्य वायोः प्रकृतेति रूपधर्मिकवायुवृत्तित्वसंदेहं प्रति वायुधर्मिकरूपाभावनिश्चयस्याविशेषेण रूपसामान्याभा

सं

३१

39

संशयस्यप्रतिबंधकत्वं यथाचप्रकृतेसंभावनासत्त्वादेव तद्रूपाभावनिश्चयः सन्देहंनप्रतिबध्नीयादिति भावः
ननु पार्थिवाद्यतिरिक्तं रूपमस्तिनवेत्याकारिकैवसंभावनाप्रसिद्धा साच तादृशरूपाप्रसिद्धा दुर्घटेत्यत आह
संभावनाचेति ननुसर्वत्रैवोक्तसंभावनायाः सामग्री संभावनारूपं नास्तीति तन्निर्णयस्य प्रतिबंध्य एव संशयो न स्या
दित्यत आह [illegible] निवर्तते वेति गोत्वादिति रूपाभावनिर्णायत्वाभावापेक्षया संभावना
विरहविशिष्टतादृशनिश्चयाभावत्वेन हेतुतायां गोत्वादित्यत आह ननु रूपाभावनिश्चयायायां वे तस्य तत्प्रत्येकप्रति
योगिकाभावत्वेनैव तादृशसंशयहेतुत्वे वाच्ये न तु तादृशनिश्चयाभावत्वेनाभावत्वेन सामान्याभावानभ्युपगमात्
ध्वंसादिभिरत्यन्ताभावस्याविरोधाच्च तथा च संभावनाकालीन रूपाभावनिश्चयानामप्रवेशो न संभावनाविरह
विशिष्टा ये रूपाभावनिश्चयास्तत्प्रत्येकप्रतियोगिकाभावत्वेनैव हेतुतायां विपरीतलाघवमित्यत आह
विनापीति यद्यपि संभावनादिविरहविशिष्टरूपाभावनिश्चयत्वावच्छिन्नाभावस्याखंडस्य तत्तद्व्यक्तित्वेन हेतुत्वे
गौरवान्नवकाश इत्युक्तं विनापीति तत्तु च सामान्याभाववा[illegible]नभ्युपगन्तॄणां मतगतरूपावच्छिन्नस्याखंडाभा
वस्य शंकितुमशक्यत्वात् विशेषाभावनिश्चयेति विशेषाभावत्वप्रकारकनिश्चयेत्यर्थः । यद्यपि रूपाभाव
मतमुद्धाप्यत्य थेति ॥ सामान्येत्यादि सामान्यपदमवच्छिन्नप्रतियोगितायां चान्वितं तथा च सामान्यावच्छि

३१
३२

वसाधकत्वा दिति भावः यद्यपि वायुवृत्तित्वसामान्याभावसाधकत्वेनैवतत्क संशयस्योपि योगित्वसंभवतिप्र
सिद्धं यत्सकलरूपं वायुवृत्तित्वस्वरूपं तदभावेवगतइति योजनाया पूर्वग्रंथाविरोधाः तत्तथापितुल्पवद्रूपा
न्नानामेकरूपेणावोधकत्वमभिप्रेत्याहतथापीति उक्तपदानांवत्रसामध्यादाहतात्पर्यमिति नन्वेवंवायुरूप
वान्नवेति अग्रिमसंशयेतपोनरूत्यमतआहअंत्यास्विति तथाचेति वायुधर्मिकरूपाभावनिश्चयस्य वायुरूपोभ
यवैशिष्ट्यावगाहित्वात्तत्वावच्छिन्नप्रत्यैवविरोधित्वया प्रकृतोपयोगित्वसंभवादितिभावः प्रकृतोपयोगार्थमाह
अधिकरणाङ्कतितदतिदृष्टांतार्थत्वचेति सप्तम्यर्थे विशेषणत्वंतथाचवायुधर्मिकरूपवत्त्वानिश्चयस्येवतद्धर्मधर्मि
करूपाभावनिश्चयस्यापि धर्मिकवायुवृत्तित्वसंशयप्रतिवंधकत्वात्प्रकृतोपयोगइति भावः एतावत्यपेवेति प्र
सिद्धरूपाण्येवरूपाणीत्यवधारणाद्दशायां तस्यैवाविशेषदर्शनत्वया प्रसिद्धरूपाभावैर्यावद्रूपाभावव्याप्यतानि
श्चयसंभवात् तद्धेतुकएव यावद्रूपाभावनिश्चयः स्यादितिभावः तेषामितिनिरोधइत्यग्रेतणान्वयः
पियावत्वेनतेषामितिपावत्प्रकारेणरूपाभावानामित्यर्थः यावद्रूपत्वेनयावद्रूपप्रतियोगिकत्वेनतत्तद्
१०निधावृत्तोरूपास्तेषांयावेत्तिरूपाणितदभावानांचवस्तुगत्यानिर्णायत्वादितिअर्थः तत्प्रतियोगित्वप्रमा
विषयावत्वोस्तीत्यस्य प्रतिवंधकत्वाया मनुपयुक्तत्वादित्यर्थः नचेतिवाच्यमित्यन्वयः तत्प्रतिवंधकत्वस्य

एवमग्रे

५८

त्वेनापि अनुगतप्रतीतिबलात्सामान्यावच्छिन्नप्रतियोगिताव्यक्तेरतिरिक्तत्वेसिद्धा तत्पर्यवातिप्रसंगभंगः
संभवतीत्याशयेनेदमभिहितमिति द्रष्टव्यं सामान्याभावत्वं निरूपामित्यादि प्रमाविशेषत्वं मिश्रमतमा
शंकते नचेतिवाच्यमिति परेणान्वयः। अभाव[illegible]भेदेत्यस्य सर्वत्रेत्यादिः नियामकत्वादिति। अन्यथा घट
पटाद्यभावयोरपि भेदेनासिद्धेरिति भावः नैवासिद्धिरिति सामान्याभावविशेषाभावयोरित्यादिः अवच्छेद
कीभूतयोः सामान्यविशेषयोर्भेदादिति भावः ननु प्रतियोगिभेदस्यैवाभावभेदनियामकत्वाद्घटपटा
द्यभावयोरपि स्वतः भेदो न तु सामान्यविशेषाभावयोरभिन्नप्रतियोगिकत्वादत आह प्रतियोगीति [illegible]
वावच्छेदकत्वे प्रागभावादीनां दिना ध्वंसात्यन्ताभावान्योन्याभावानां परिग्रहः अभेदप्रसंगाद्वाऽसिद्धिप्रसंगो
न नन्ववच्छेदकभेदस्य नियामकत्वे पूर्वोक्तदोषतादवस्थ्यं घटत्वादिलक्षणावच्छेदक[illegible]मैक्यात्कत्वादत आह
अवच्छेदकोत्तिविशिष्टाचित्कस्यान्योन्याभावस्थले तादात्म्यस्य तथात्वादित्यन्वयः अवच्छेदकत्वादिनितद
र्थः एवमग्रेपि च विशिष्टात्यन्ताभावस्थले संसर्गस्य संयोगादेः क्वाचिदिति ध्वंसस्थले पूर्व[illegible]कालीनत्वद घट
त्वस्य प्रागभावस्थले चोत्तरकालीनत्वस्य घटत्वस्य प्रतियोगितावच्छेदकत्वादित्यर्थः दुर्वचत्वादितिप्रथा चानवु
गमात्कथंनियामकत्वमिति भावः ननु संसर्गविधया विशेषणविधया वाऽवच्छेदकयोरन्यतरभेद एव नियामकोऽव

स्मात्स्याभावमादिनः अनिश्च संगाहनिश्चभाव सादिप्रकारेणानिश्चयमान्याभाव निश्चयेन इत्यसंशयानुत्पत्तिप्रसंगादिः

न्नत्वस्वावच्छिन्नप्रतियोगिताकत्वसंसर्गेणाभावनिर्णय एव संशयविरोधीत्यर्थः ॥ सचेति तादृशनिश्चयोपन
संशयस्थलत्वमित्यर्थः तत्सत्वे संशयस्यकेनाप्यनंगीकारात् इति भावः ॥ ननु विशेषाभावस्यैव सामान्यावच्छिन्न
प्रतियोगिताकत्वे रूपवत्यपि रूपं नास्तीति प्रत्ययस्य प्रामाण्यापत्तिस्तत्रापि यत्किंचिद्रूपाभावसत्वादत आ
ह अभावस्य चेति ननु विशिष्टस्यानतिरिक्ततया तद्दोषतादवस्थ्यमत आह तदवच्छेदेनेति यावद्रूपाविशे
षाभावा■धिकरण■■त्वावच्छेदेनेत्यर्थः तथा च रूपवति यावद्विशेषाभावानधिकरणत्वाद्देवेत्तं रूपं ना
स्तीति प्रत्ययः नान्विदमसंभवदुक्तिकं तद्रूपत्वावच्छिन्नप्रतियोगितायाः एवं रूपत्वावच्छिन्नप्रतियोगिताया
द्रूपत्वावच्छेदेनापि तद्रूपाभावस्य रूपत्वावच्छिन्नप्रतियोगिताकत्वात् अन्यथा तत्तद्रूपत्वावच्छिन्न■■प्र
तियोगिताकत्वमपि तदवच्छेदेन न स्यादत आह संभवति चेदमिति इदं यावद्विशेषाभावाधिकरणा
वच्छेदेनैव सामान्यावच्छिन्नप्रतियोगिताकत्वं तादृशीति सामान्यावच्छिन्नप्रतियोगिताया यावद्विशेषध
र्मावच्छिन्नप्रतियोगितातिरिक्तत्वादित्यर्थः यद्यपि सामान्यविशेषावच्छिन्नयोः प्रतियोगितयोरैक्ये
ऽपि न क्षतिः सामान्यावच्छिन्नत्वविशिष्टप्रतियोगिताकत्वावच्छिन्नस्य विशेषवत्यसत्वादेवोक्तिप्रसंगात्
अन्यथा गुणान्यत्वविशिष्टं वस्तुगतायत्स्यत्वं तस्यैव गुणेऽपि सत्वात्तत्रापि विशिष्टसत्ताप्रतीत्यापत्तेः

नन्विद | न५
त्वाद् |
वत्वात् | पाता७
| न२

अ८

तत्पदेनाखंडधर्मस्यावच्छेदकीभूतधर्मस्य विवक्षणात् गुरोरवच्छेदकत्वोपगमात् नोक्तदोष इत्यपि वदंति मानाभा
वादिति तथाच तत्तद्रूपावच्छिन्नाभावो रूपत्वाद्यवच्छिन्नप्रतियोगिताकान्यरूपत्वे ... धर्मावच्छिन्नप्रतियोगिताभिन्ना इत्यनु
मानमप्रयोजकमिति भावः अत एवेति उक्तव्याप्तौ मानाभावादित्यर्थः दुःखादीत्यादिना धर्म... पदमीदृशः परिग्र
हः नचात्मत्वापेक्षया गुरुत्वेन सुखत्वादेरवच्छेदकत्वासंभवस्तस्येश्वरवृत्तितयातिप्रसक्तत्वेन लाघवस्याकिंचित्कर
त्वादिति भावः न च सुखत्वावच्छिन्नस्य चैत्रादिसत्वेपि भूजलादाविदानींदुःखविशिष्टो नास्तीतिप्रत्ययादिदमसंगतमत आ
ह तत्तत्संख्यातीति व्यक्त्यपेक्षया गुरूणां संख्यात्वादेरवच्छेदकत्वायोगादुक्तं तत्त्वादिति नानाधर्मावच्छिन्नेति नानाधर्मा
वच्छिन्नप्रतियोगिताक इत्यर्थः नन्वुक्तव्याप्तेरसत्वे घटपटाद्यभावानामपि भेदो न सिद्ध्येदत आह भेदसिद्धिरिति तथाच
घटत्ववृत्तित्वादिविरुद्धधर्मवत्त्वादेव घटाद्यभावादेर्भेदः पटाभावादौ साध्य इति भावः अवृत्तीनामिति येन संबंधेन यान्य
वृत्तीनि तेन संबंधेन तेषामेक एवाभाव इत्यर्थः तेन वृत्तिमतो विरूपादेः संयोगादिसंबंधेनाभावस्यापि ग्रहः समनियतानां

तत्रेपकल

मिति [illegible] परिमाणादिव्यक्तीनामित्यर्थः युगपदुत्पन्नानामेक एव ध्वंसो युगपदुत्पन्नानां चैक एव प्रागभाव इ
त्यर्थः समदेशावच्छिन्नयोरपि विभिन्नकालोत्पन्नविशिष्टयोरपि प्रागभावध्वंसनानात्वाद्युगपदित्युक्तं व्यधिकरणयोः
समानाधिकरणयोरपि न्यूनाधिकदेशवृत्तिकयोर्युगपदुत्पादविनाशशालिनो रूपसंयोगाद्योः प्रागभावध्वंसस्य च

कत्वइतिनानुगमइत्यतआह पूर्वेतिमानाभावाच्चेति तथाच सर्वसाधारणाभावादिति भावः ननूक्तक्रमेणावच्छेदक
भेदोनित्याभावभेदकोवक्तव्यइत्यतआह किंचेति एकाभावनिष्ठस्यापराभावभेदस्याधिकरणस्वरूपत्वमतोऽतिरि
क्तत्वमप्यस्यानित्यत्वादिति भावः यद्यपितत्तद्रूपाभावीयावच्छेदकता तत्तद्रूपभेदत्वस्य तत्तद्रूपाभावभेदे तत्समाना
धिकरणं तद्रूपत्व घटत्वादावेवसुलभं तथापिय[illegible]क्तस्य तत्तद्रूपाभावे सत्वेच व्यभिचारित्वात् यदभावप्रति
योगितावच्छेदकत्वनि[illegible]ष्ठा यदभावप्रतियोगितावच्छेदकभेदोयत्र तत्तदभावत्त्वविशिष्टस्तदभावभेद इत्येवंव्या
प्तिर्वाच्येति तत्रैव वैयधिकरण्यइष्टव्याप्तिमितिध्येयं। अतएवउक्तक्रमेण वैयधिकरण्याहेवनवृत्यत्रात्यताभावे
यद्धर्मावच्छिन्नावच्छिन्नाभावाद्वृत्तिस्तत्रावश्यं तदन्यधर्मावच्छिन्नप्रतियोगिताकत्वमित्युक्तौ न वैयधिकरण्या
वकाशइत्यतआह अभेदेपीति सामान्याभावविशेषाभावयोः प्रत्येकेषूक्तनियमस्याप्याविरुद्धत्वादित्यर्थः तथाचाभा
वभेदासाधकत्वेनोक्तव्यापकत्वमसमर्थतरग्रस्तमिति भावः नचैवमादि घटत्वेतरसंयोगसंबंधावच्छिन्नप्रतियो
गिताकेघटत्वावच्छिन्नाभावे व्यभिचारस्य वारणाय प्रथमधर्मपदं विशेषणविधयावच्छेदकं स्यात्प्रापकं समवा
यसंबंधेनघटत्वावच्छिन्नप्रतियोगिताके समवायसंबंधावच्छिन्नघटाभावे तद्वारणाय द्वितीयधर्मपदं नचगु
रूधर्मावच्छिन्नाभावाप्रसिद्ध्या व्याप्यत्वासिद्धिस्तदितरस्य नेन तद्धर्मानवच्छेद्यप्रतियोगिताकत्वस्य विवक्षितत्वा

विभिन्नत्वात् समनियतदेशानामित्युक्तं मूलाग्रावच्छिन्नरक्तश्यामिकयोर्युगपदुत्पन्नविनष्टयोरपि संयोगयोर्ध्वंसप्रागभावाना
नात्वादाह अत्र सतीति तत्र ध्वंसादेरेकत्वे मूलावच्छिन्नसंयोगोऽग्रे नष्ट इत्यादिप्रतीत्यापत्तिरेव बाधिकेति भावः यद्युगप
दुत्पन्नविनष्टानामपि समनियतरूपादीनां ध्वंसादेरैक्यं तथा सतीति तद्रूपं नष्टमिति वत्तद्रसो नष्ट इत्यपि प्रत्ययापत्तेः
रूपध्वंसस्यैव रसध्वंसत्वे च स्तुरये। ग्यत्वस्य वक्तुमशक्यत्वादत उक्तमसति बाधक इति तत्र चुध्वं रसध्वंसव्यक्तेश्चक्षुर्योग्य
त्वे रसप्रतियोगिकध्वंसत्वेन योग्यत्वसंभवात् प्रतियोगिविशेषमन्तर्भाव्य वा भावस्य तत्तदिन्द्रिययोग्यतायां निषेधाच्चत्वा
दिति पूर्वं च रक्तश्यामयुगपदुत्पन्नस्यैव पाकजातरूपादिचतुष्टयविभिन्न एव प्रागभावः कथमन्यथा सामग्रीभेदे कार्यास
रूपादेर्मिथो भेद इत्यत आह उक्तमसति बाधक इति न च तत्तानामिव जन्यानामपि रूपादिचतुर्णां विरुद्धधर्माध्यासादे
व भेदोपपत्तौ सामग्रीभेदस्य कार्यभेदाप्रयोजकत्वे सामग्रीभेदस्य कार्यभेदयोः प्रतियोगितायां नानात्वमभिप्रेत्य वस्तु
तः स्तद्धर्मानधिकरणेषु सर्वेष्वेव तद्धर्मावच्छिन्नैकप्रतियोगितास्वीकारे घटनिष्ठपटत्वावच्छेद्यत्वापत्तेरेव पटनि
ष्ठघटत्वावच्छिन्नप्रतियोगिताकाद्यभावस्यापि घटत्वेन पटो नास्तीत्यादिव्यवहारस्य प्रामाण्यापत्तिरतोऽतिरिक्ता प्रतियो
गिताप्याश्रयभेदान्नानैवेति ध्येयं सर्वं चेति समानाधिकरणेऽस्त्वित्यर्थः तथा च व्यधिकरणधर्मावच्छिन्नप्रतियोगि
तायाः संबंधावच्छिन्ने तथा विवेचितमधस्तादिति ॥ लाघवादाह आकाशाभाव एवेति कालाद्यभावस्याप्याकाशा

भावत्वान्नैव काराद्यसंगतिः एवमिति तत्तदधिकरणामंतर्भाव्य विशेषाभावैरेव सामान्याभावस्यान्यथासिद्धावित्यर्थः देशे काले
चव्याप्यवृत्तीनां घटादीनामभावस्य तत्तदधिकरणावृत्त्यभावमात्रेणान्यथा कर्तुमशक्यत्वादाह तत्तद्देशकालानवच्छि
न्नेति प्रतियोग्यनवच्छेदकीभूततद्देशकालावच्छिन्नेत्यर्थः अन्यथा कोणकृत्वमध्ये गृहे घटो नास्तीति तदानीमेवेदा
नीमपि गृहे घटो नास्तीत्यादि प्रत्यये घटाद्यवच्छेदमशक्यतावच्छेदेनापि स्यात्तदधिकरणवृत्त्यभावस्य प्रतियोगिताक
त्वानियमादिति भावः व्याप्यवृत्तीनां अभावस्य गोत्वादिरूपस्य तत्तदधिकरणवृत्तित्वाविशिष्टभावमात्रेणान्य
न्यथासिद्धिसंभवात्तत्र देवकालावच्छिन्नत्वं न प्रवेश्यमित्याशयेनाह अनवच्छिन्नेति देशकालानवच्छिन्नेत्यर्थः तत्तद
धिकरणेति प्रतियोगिशून्येत्यादिः विशिष्टत्वानतिरिक्तत्वादाह तदवच्छेदेनेति देशकालावच्छिन्नानवच्छिन्नतत्तदधिक
रणवृत्तित्वावच्छेदेनेत्यर्थः तद्भेदोपीति पटघटाद्यभावभेदोपीत्यर्थः सामान्याभावस्य लाघवपुरस्कारेणोत्पादितभा
वः शंकते तत्प्रतियोगिकत्वमिति तत्तदभावस्तत्तदभावतारूपमस्त्विति सामान्याभावप्रतियोगिताकत्वमपि तत्तद्विशे
षाभावतादृशाभावलक्षणे तत्प्रतियोगिकत्वे ऽधिकरणाविशेषवृत्तित्वस्यांतर्भावो घटत्वमवच्छेदकत्वं वा न युक्तं
तदभावस्वरूपस्य सर्वत्राविशेषादिति तथा च घटाभावस्यैव पटाभावत्वे पटवत्यपि घटो नास्तीति प्रतीत्यापत्त्या प्रतियोगिभेद
इति भावः शंकां निरस्यति इतीति समानमिति सामान्यावच्छिन्नप्रतियोगिताकत्वमपि तत्तद्विशेषाभावस्वरूपमेवेति तत्र या

वह्निविशेषाभावाधिकरणवृत्तित्वस्यांतंतर्भावादनवच्छेदकत्वाच्च रूपवत्यपि रूपं नास्तीति प्रतीत्यापत्त्या सामान्यविशे
षाभावयोरस्वरूपभेदे नेत्यर्थः व्यासज्यवृत्तीति तथा च पर्याप्त्याधिकरणस्याविशेषाभावकूटस्य विरहादेव रूपव
ति रूपं नास्तीति न प्रत्यय इति भावः तत्तदभावस्य तत्तदभावपर्यवसितसामान्यावच्छिन्नप्रतियोगिताकत्वस्वरूप
स्य तत्त्वं व्यासज्यवृत्तित्वं ननु सामान्यावच्छिन्नप्रतियोगिताकत्वं न तु तदभावस्वरूपं किं त्वतिरिक्तमेवेति तस्य
व्यासज्यवृत्तित्वकल्पने बाधकाभाव इत्यत आह अतिरिक्तकल्पने चेति अतिरिक्तेनेति प्रागुक्तघटपटादिप्रति
योगिकैकाभावकल्पनेनेत्यर्थः घटपटत्वादिनानाप्रतियोगिकत्वमपि न तदभावव्यक्तिस्वरूपं किंतु सामान्या
वच्छिन्नत्ववदतिरिक्तमेव वाच्यमिति घटादिशून्यतत्तदधिकरणावच्छेदेनैकस्यातिरिक्ताभावस्य घटपटादिप्र
तियोगिकत्वं स्याद्बाधकाभावात् तथा च घटपटाद्यभावानां मिथो भेदो विलुप्येतेति पूर्वमेवानुवर्त्तत इति भे
दः ननु घटपटयोरिव तदुभयाभावयोरपि मिथो भेदस्यानुभवसिद्धत्वान्न तद्विलोपप्रसंगः सामान्यावच्छिन्न
प्रतियोगिताकत्वस्यातिरिक्तस्य व्यासज्यवृत्तितायां बाधकप्रतिबंधी अनुत्तरं चेत्यत आह किं चेति व्यासज्य
वृत्तिप्रत्यक्षं प्रत्येकाधिकरणापन्नयावदाश्रयाणां सन्निकर्षस्य हेतुत्वे वक्ष्यमाणातिप्रसंगासंभवात्
तथा हेतुतायां व्यभिचारं दर्शयन्नाह बाधिकरणायोरिति इंद्रियसन्निकर्षइत्यस्याविशेषवदधिकरण त्वं

पि॰४

याद्रिकेरेण मात्रावच्छेदेनेत्यादिः। प्रत्ययः। साक्षात्कारः तथा च घटपटमात्रसन्निकर्षेपि रूपं नास्तीति प्रत्यक्षं
स्यात् रूपाभावकूटस्यैवोभयत्र संनिकर्षादिति भावः। ननु व्यासज्यवृत्तिव्यक्त्यंतरप्रत्यक्षोत्तरं भूतपक्षे प्रत्यै
काधिकरणापन्नयावदाश्रयसन्निकर्षस्य हेतुत्वे घटपटव्यतिरिक्ताभावसामान्यावच्छिन्नप्रतियोगिताकत्व
प्रत्यक्षं प्रतित थाविधसन्निकर्षत्वेन हेतुत्वे बाधकाभावान्नोक्तदोष इत्यत आह। पिचोति रूपांतरेणेति व्या
सज्यवृत्तिता निरूपकेन संयोगत्वादिभिन्न गुणत्वादिप्रकारेणेत्यर्थः प्रकृतमभिप्रेत्याह संबंधविषयते तिमा
नाभावादिति द्रव्यांतरासन्निकर्षदशायां घटो गुणवानित्यादिप्रत्यक्षेण गुणत्वादिप्रकारेणाद्वित्वादेर्घटे रू
पप्रतियोगिको ऽभाव इत्यादिप्रत्यक्षेणैव रूपप्रतियोगिताकत्वप्रकारेण रूपत्वावच्छिन्नप्रतियोगिताकत्व
प्रकारकत्वेन रूपत्वावच्छिन्नप्रतियोगिताव्यक्तेर्विषयीकरणेऽक्षत्यभावादिति भावः सामान्याभावेति
त्वावच्छिन्नप्रतियोगिताकत्वसंसर्गेण रूपत्वादिसामान्यविशिष्टवैशिष्ट्यावगाह्यभावप्रत्यक्षप्रसंग
इत्यर्थः न च संसर्गप्रकारकसाधारणसामान्यावच्छिन्नप्रतियोगिताकत्वलौकिकप्रत्यक्षमात्रं प्रत्येव निरु
क्तयावदाश्रयसन्निकर्षत्वेन हेतुत्वान्नोक्तदोषः तथा सत्यनंतसामान्यांतर्भावेन मनंतकार्यकारणभाव
कल्पनाभवेक्ष्यत्वाघवादतिरिक्तसामान्याभावकल्पनस्यैव युक्तत्वादिति भावः न च यत्किंचिद्रूपाभाव

ग॰३

२६

तदीय१   स्यत्र सिद्धाविव ऽ ऋ प्रतियोगिकत्व विशिष्ट अतिरिक्ताभावसि   द्धौ १

मिसव

सा५

योगित्ताकत्वस्यापर्य्याप्त्याख्यसंबंधेऽ[struck]वच्छिन्न येन चातिरिक्तरूपं नास्तीति प्रत्यक्षप्रमाणस्य तुल्यत्वे[illegible]व शम
तिरिक्तः सामान्याभावो वाच्य इति भावः ननु यत्र प्रमाणसंभावेपि धर्मकल्पनातो धर्मिकल्पनायां गुरुत्वमि
ति न्यायलब्धमेव गौरवं सामान्याभावे धर्मिणि बाधकं भाविष्यत्यत आह धर्मेतिकल्पनीयेति तथा चानेक
स्याकल्पतया सामान्याभावधर्मिणः कल्पनेबाधकाभावः नच सामान्याभावधर्मिणः कल्पनेतत्पृथुक्क्रम
नेकं कल्प्यमेवा[illegible] शंक्यनिराचष्टे न चेति वाच्यमिति परेणान्वितं बाधादीति रूपाद्यभावाभिप्रायेणैवं स
तीति धर्मिकल्पनोत्तरकल्पना गौरवस्यापि धर्मकल्पनाविशेषित्वादित्यर्थः अभावमात्रेति तत्तद्रूपादिप्रतियो
गिकत्वेनातिरिक्ताभावस्यानंतभूतलाद्यधिकरणात्तत्संबंधस्याकल्पनामपेक्ष्य क्लृप्तानंतभूतलाद्यधिकर
णावृत्तिकेषु तत्तद्भूतलत्वादिधर्मेषु तत्तद्रूपत्वाद्यवच्छिन्नप्रतियोगिताकत्वकल्पनायामेव लाघवस्य सुवच
त्वात् तत्तद्रूपादिविशेषाभावोप्यातिरिक्तो न सिद्ध्येत् तथा च तद्रूपं नास्तीत्यनुगतप्रतीत्या तिरिक्तविशेषाभाव
सिद्धौ सत्यां तत्रानेकाधिकरणे कल्पनागौरवस्य फलमुखत्वाददोषत्वेन प्रकृतेपि सामान्याभावे तत्सुवचमि
ति भावः अत्र प्रतिवं[illegible]त्तराभित्यस्वरसः कोचिदाङ्कृरित्यास्तां सूचितः ॥ ० ॥ इति सामान्याभाववादटिप्पनी सम्पूर्णा

दीरस्य१ न त्रिव२

पर्यपर्याप्तिस्वाश्रयैः अधिकरणत्वपर्याप्त्यासीदं येनेत्यर्थः ननु पृथिवीत्ववति समवायेन रूपत्वस्याभावात् कथं तन्निष्ठा
भावाप्रतियोगित्वमत आह ७   वह्निमन्नात ८

॥१०॥ इदं पृथिवीत्वादित्यादावव्याप्त्यभावादाह नानाव्यक्तीति जातित्वेन शब्दत्वेन वा नानाव्यक्तेः साध्यतायामव्या
प्यभावाद्रूपादित्युक्तं रूपवान् रसादित्यादौ यद्रूपव्यक्तेः प्रतियोगिव्यधिकरणं यद्रसवन्निष्ठाभावप्रतियोगित्वं त
द्रूपसामानाधिकरण्यस्य तद्रसव्यक्तौ व्याप्तिलक्षणसंभवादाह एकव्यक्तीति रूपवान् तद्रसादित्यादावेकव्यक्तिकेताव्या
प्यभावात् पृथिवीत्वादित्युक्तं अव्याप्तिरिति रूपमात्रस्य चालनीन्यायेन तत्तत्पृथिवीनिष्ठप्रतियोगिव्यधिकर
णाभावप्रतियोगित्वादिति भावः न चेति वाच्यमित्यनेनान्वयः रूपवत्वं रूपाधिकरणत्वं तद्व्यधिकरणाभेदाद्वि
त्तमवेत्युक्तदोषतादवस्थ्यादाह तत्त्वेति रूपत्व पृथिवीत्वयोः साक्षात्सामानाधिकरण्याभावात् कथं तयोर्व्या
प्तिरित्यत आह तेन चेति तदभावो रूपत्वादेः भावः प्रतियोगितावच्छेदकसंबंधेन प्रतियोग्यनधिकरणीभूतहेतुमन्नि
ष्ठाभावस्य साध्यतावच्छेदकसंबंधेनैव प्रतियोगिताया लक्षणघटकत्वादिति भावः असाध्यत्वमनुमित्यविधेयत्व
ननूक्तव्याप्तिज्ञानाद्रूपत्वादिसाध्यकैवानुमितिर्व्याप्यं तत्तज्ज्ञानादेव रूपादिसाध्यकानुमितेः संभवात् स्वरूपत्वेति रूपत्वा
पच्छिन्नवत्तासंबंधेन रूपादेः साध्यतायामुक्तज्ञानादपि रूपादिसाध्यकानुमित्युत्पादे बाधकाभावादसत्त्वमत आह इत्या
द्यैर्वादिति अव्याप्तिरिति व्याप्यवृत्तिसाध्यकस्थले प्रतियोगिवैयधिकरण्यप्रवेशानुपादेयत्वात् न च तल्लक्षणस्या
ति व्याप्तिरित्यर्थः ननु तत्र हेतुमन्निष्ठाभावप्रतियोगित्वं वैशिष्ट्यानवच्छिन्नत्वाच्च मत्ता नाव्याप्तिरित्यत आह

न्म२

र्गै१ शित्वा३ त्वा४ तायप५ एव५ म३

भावापत्तेर्वैपुत्तेजकाभावविशिष्टमणित्वावच्छिन्नप्रतियोगिताकत्वेनानुगतधर्मेणाविशेषाभावानामेव तत्त्वेहेतुत्व
अवच्छेदकगौरवापत्तेरस्माकं त्वखंडतादृशमण्यभावव्यक्तेस्तद्व्यक्तित्वेनैव हेतुतायामवच्छेदकलाघवात् न चोत्तेज
काभावविशिष्टम[illegible]अवच्छिन्नप्रतियोगितासंबंधेन मणिर्वद्भाववत्वेनैव हेतुत्वं तादृशप्रतियोगिताकत्वस्याभावत्वविशे
मणित्वावच्छिन्नीयसंसर्गविरहादन्यथा मणिमत्यपि देशे मणिर्नास्तीति प्रतीत्यापत्तेर्विशिष्टमणित्वावच्छिन्नप्रतियोगिता
कत्वसंबंधेन यो मणिर्भावस्तस्य तत्र सत्वात् घटत्वावच्छिन्नप्रतियोगिताकत्वं घटत्वविशिष्टस्यैव संसर्गो न तु इत्यत्व
प्रमेयत्वादिविशिष्टस्येति निर्धर्मे घटे घटो नास्तीति एवं प्रत्ययो न स्यादेवं प्रमेयं नास्तीत्याकारः इति सिद्धांतः नन्वप्रतियो
गपविशेषितस्य [illegible]भावस्य तद्व्यक्तित्वेन हेतुतायां [illegible]न्यथासिद्धिरन्यथा मणेस्तत्तद्ध्वंसादीनां चान्यतमत्वावच्छि
न्नाभावस्याप्यखंडस्य तत्तद्व्यक्तित्वेन साहजेन कल्पापत्तेरिति वाच्यं त्वन्मतेपि तद्दोषस्य तुल्यत्वात् यद्धर्मावच्छिन्ना
भावत्वापेक्षया यद्धर्मावच्छिन्नाभा[illegible]त्वं गुरु तत्तद्धर्मावच्छिन्नाभावव्यक्तेरन्यथासिद्धेरुक्तत्वादिति वदंति यत्तु वि
शेषाभावकूटस्य सामान्यावच्छिन्नप्रतियोगिताकत्वोपगमे प्रमेयत्वं नास्तीति प्रमेयं नेदं इत्यादिप्रतीतेः प्रामाण्याप
त्तेः तत्तत्प्रमेयात्यंताभावकूटस्य च प्रमेयत्वावच्छिन्नप्रतियोगिताकत्वसंभवादिति तन्न प्रतियोगितावच्छेदकीभूतं

यत्सामान्येन द्रव्यावच्छिन्नप्रतियोगिताकत्वस्यैव विशेषाभावकूटे गुरुस्वीकर्तव्यत्वादन्यथासामान्याभावस्वीकारेपि तद्दोषतादा
द वस्थ्यादिति संक्षेपः तद्व्यासज्यप्रतिसामान्यावच्छिन्नप्रतियोगिताकत्वेपर्याप्तिलक्षणो व्यासज्यवृत्तित्वस्यैत्यर्थः न नूत्तरसा
मान्यावच्छिन्नप्रतियोगिताकत्वं तदाश्रयोभयोः कल्पनावच्छिन्नत्विसामान्यावच्छिन्नत्वं तद्व्यासज्यवृत्तित्वोभयोः कल्प
नात्कुत एकत्र लाघवमत आह कल्पनीयेति एतदतिरिक्ताभावे सामान्यावच्छिन्नप्रतियोगिकत्वं तस्य व्यासज्यवृ
त्ति सामान्यावच्छिन्नप्रतियोगिताकत्वस्य गुरुत्वादिति पर्याप्तेः संबंधांतरनियतत्वेन वक्ष्यमाणभावेषु कल्पनीय
स्वरूपसंबंधेन गुरुत्वादित्यर्थः ननु पर्याप्तेः संबंधांतरनियतत्वे मानाभावात् विशेषाभावेषु सामान्यावच्छिन्न
प्रतियोगिताकस्यातिरिक्तपर्याप्त्याख्य एव संबंधो वाच्यो ननु स्वरूपसंबंधोपीति विशेषाभावकूटेपि सामान्याव
च्छिन्नप्रतियोगिताकत्वस्य पर्याप्तिमात्रकल्पनायां न गौरवमत आह विनिगमनाविरहेपीति विवादास्पदयोरर्थ
योरेकमात्रप्रमाणस्य सद्भावो विनिगमनाविरहस्थले च यत्रोभयत्रैव प्रमाणाविरहस्तत्रोभयमेव न सिध्यतीति तथा
च चक्रविशिष्टदंडत्वे नैव दंडविशिष्टचक्रत्वेनापि घटं प्रति जनकत्वलाघवसहकृतप्रत्यक्षादिप्रमाणेन दंडत्वच
क्रत्वाभ्यामेव तदवधारणात् यत्र चोभयत्रैव प्रमाणस्यावतारस्तत्र द्वयमेव सिध्यतीति प्रकृते सामान्यावच्छिन्नप्रति

तान ३

२८

रित्यत आह अन्यथेति ननु विशेष्यवति विशिष्टाभावो विशेषणाभाव एवेति द्विष्ठनिष्ठस्य द्व्याप्यत्व विशिष्टस
त्ताभावस्य प्रतियोगित्वं द्व्याप्यत्वादेर्विशेषण एवेति न तु विशिष्टसत्तायामतो नाव्याप्तिरत आह व्युत्पादयिष्यत्ते
चेति विशिष्टाभावस्तावदतिरिच्यतां नो वा द्व्याप्येतदन्यत्वविशिष्टसत्ता नास्तीति प्रतीतिबलाद्व्याप्तिनिष्ठाभावस्य वैशिष्ट्या
वच्छिन्नप्रतियोगित्वं पुनः सत्तायामावश्यकं अन्यथा विशिष्टसत्तावान्जातेरित्यादावतिव्याप्त्यापत्तेरिति भावः के
चित्तु विशेषणविशेष्ययोः संबंधाभावपर्यवसन्नस्य विशिष्टाभावस्य प्रतियोगित्वं तदुभयोः संबंध एव न तु वि
शेष्य इति नाव्याप्त्यवकाश इत्यत आह अन्यथेति विशेष्यस्य विशिष्टाभावप्रतियोगित्व इत्यर्थः ननु लक्षण
ति प्रसंगवारणायोपपत्तिर्नेवं सत्त्वसाधिकां इत्यत आह व्युत्पादयिष्यत इत्युक्तेत्याशङ्कः ननु साध्यतावच्छेदक
वच्छिन्नावेन यद्वैशिष्ट्यावच्छिन्नं प्रतियोगित्वं तदन्यत्वेन हेतुमन्निष्ठाभावप्रतियोगित्वं विशेषणीयं अतो नोक्त
व्याप्त्यतिव्याप्ती अत आह द्वित्वादीति तथा च सत्तागुणत्वोभयाभावस्य द्रव्यसमवायासत्तावान्द्रव्यत्वादि
त्यत्राव्याप्तिः न च साध्यतावच्छेदकाभिन्नो यः साध्यनिष्ठो धर्मस्तदनवच्छिन्नैव हेतुमन्निष्ठाभावस्य प्रतियोगिता
विशेषणीयेत्युक्ताव्याप्त्यादिदोषस्तथापि प्रमेयत्वावच्छेदेत्यादावव्याप्त्यापत्तेः घटत्वाद्यवच्छिन्नाभावस्य

वा न्

ता ७

वीक्या २ [illegible] ३

ताद्दशधर्मावच्छिन्नत्वात्प्रमेयत्वावच्छिन्नाभावस्य अप्रसिद्धत्वादिति भावः सार्वभौममतमुपपादयति अथेति अप्रतियोगित्वं
मूर्त्तोक्ताप्रतियोगित्वं तत्स्पार्थः प्रतियोगित्वाभावो हि केवलमन्निष्ठाभावप्रतियोगित्वाभावः नन्वेवं तद्रूपवान्नात्याप्त्यादित्या
दावतिव्याप्त्यापत्तिस्तद्रूपे पृथिवी[illegible]रूपत्वाद्यवच्छेदेन ताद्दशप्रतियोगित्वाभावसत्वादतो विशेषधर्ममंतर्भावेति सचेति तथा च
पुमन्निष्ठाभावप्रतियोगित्वाभावावच्छेदको यो धर्मस्तदवच्छिन्नसामानाधिकरण्यमेव तद्धर्मावच्छिन्नस्य व्याप्तिरिति
भावः रूपवान् पृथिवीत्वादित्यादावव्याप्तिमुद्धरति अस्ति चेति अयं रूपत्वाद्यवच्छेद्यः पृथिवीत्ववन्निष्ठाभावप्रतियोगि
त्वाभावो रूपादावस्तीत्यर्थः प्रमाणमाह रूपत्वादिनेति प्रतियोगितायाइति पृथिवीनिष्ठाभावप्रतियोगिताया इत्यर्थः
अवच्छेदकत्वाभावइति प्रात्यक्षिकप्रतीत्यभिप्रायेण तथाविधशब्दस्य तु ताद्दशप्रतियोगित्वं न रूपत्वावच्छेद्यत्वमि
त्यर्थो ग्राह्यः तदभावेनेति ताद्दशप्रतियोगित्वाभावेत्यर्थः तथा चोक्तलक्षणाप्रसिद्धिरिति भावः रूपत्वाद्यवच्छेदेन ताद्दश
प्रतियोगिताभावबोधकमाह सर्वत्रेति ननु ताद्दशप्रतियोगित्वमित्यत्र तदभावोप्यव्याप्यवृत्तिरिति तत्तद्रूपावच्छेदेन ता
द्दशप्रतियोगित्वाभावसत्वाद्वा यत्तापि ताद्दशप्रतीतिर्वाधिकेति अतआह अन्यथेति घटजनकत्वं दंड
त्वेन न तु द्रव्यत्वादिना घटाभावप्रतियोगित्वं घटत्वेन न तु पटत्वादिनेत्यादिप्रतीत्या द्रव्यत्वाद्यवच्छेदेन घटादेर्घ
टजनकाद्यभावः पटत्वाद्यवच्छेदेन घटाभावप्रतियोगित्वाभावश्च घटादेः सिद्ध्यदिति भावः प्रतिवं[illegible]त्वादा-

॥४०॥

भावस्या ३

घटे ३ देननुत्तन १

तत्साध्य: पिंडस्य वह्नेः स्त्वादृत्तितया न तदवच्छेदकं न धूम प्रतिष्ठ सामानाधिकरण्य निरूपकता

प्रमेयेति सुवचत्वाच्चेति तथा च प्रमेयधूमसवान् वह्नेरित्यादावतिव्याप्तिरिति भावः अन्ये तु तथा च साध्यतन्निष्ठ सामानाधिक
रण्यनिरूपकतावच्छेदक यद्धर्मावच्छेदेन हेतुमन्निष्ठाभावप्रतियोगित्वाभाव तद्धर्मावली सामानाधिकरण्यं व्याप्ति
रित्यर्थः अत्र साध्यतन्निष्ठसामानाधिकरण्य निरूपकताया अवच्छेदकत्वमनतिरिक्तवृत्तित्वविशिष्टस्वरूपसंबंधः । स्वरूपसं
बंधमात्रं वा प्रथमे असमानेति असमानाधिकरणाधूमो यस्मात् तन्नाय पिंड तद्वह्नेः साहृत्तितया न तदवच्छेदकं न धूमानिष्ठस
मानाधिकरण्य निरूपकताया अवच्छेदकत्वमनतिरिक्तवृत्तित्वविशिष्टं स्वरूपसंबंधविशेषं स्वरूपसंबंधमात्रं वा
प्रथमे असमानेति असमानाधिकरणो धूमो यस्मात् [illegible] नातिरिक्तवृत्ति [illegible] तथा च वह्निमान् धूमादित्यादावव्याप्तिरि
ति भावः । द्वितीयेत्वाह कंबुग्रीवेत्यादि असाध्यत्वं अव्यापकत्वं घटत्वाद्यपेक्षया गुरुतरं कंबुग्रीवादिमत्वाद्यधिकाधि
कारिकरणत्वं प्रसिद्धं तस्य सामानाधिकरण्यनिरूपकतानवच्छेदकत्वादिति भावः । अतएव लघुसमनियत गु
रूपेणासाध्यतायामेव नातिरिक्त इति प्रमेयधूमसाध्यके व्यभिचारिण्यतिव्याप्तेर्निरासे पि तत्साध्यकसद्धेतावव्या
प्तितादवस्थ्यादिति भावः न च पूर्वलक्षणाद्यवात्रापि साधनव निष्ठाभाव प्रतियोगितावच्छेदकं यद्धर्मविशिष्टसंबंधि
निष्ठाभावप्रतियोगित्वाभावावच्छेदकं तद्धिन्नधर्मवत्ता सामानाधिकरण्यं व्याप्तिरिति वक्तव्ये वनिस्ताद्व्याप्तिसाध्यं तादृशप्र
तियोगित्वाभावश्चात्र विशिष्य [illegible] प्रतियोगित्वाभावकूटत्वेनानिवेशः अन्यथा गुरुरवच्छेदकत्वे विनानुवर्त्त्यत्वापत्तेस्तथा

तताउ१

भाव २ प्रतियोगिताभाव २

चवह्निमान् धूमादित्यत्रैवाव्याप्तिर्धूमवन्निष्ठाभावप्रतियोगितावच्छेदकीभूतस्य घटत्वादेः स्वविशिष्टसंबंधिनिष्ठप्रत्य
भावीयप्रतियोगितानवच्छेदकत्वेन पारिभाषिकावच्छेदकाप्रसिद्धेः घटादौ घटाद्यभावस्य व्याप्यवृत्तित्वेनावच्छेदकानपेक्ष
णात् न च तादृशयत्किंचित्प्रतियोगिताभावस्यैवावच्छेदकत्वं निवेश्यं तथा च घटत्वादेः स्वविशिष्टसंबंधिनिष्ठस्य
तत्तद्घटाभावस्य प्रतियोगिताभावावच्छेदकतयैव पारिभाषिकावच्छेदकमिति वाच्यं तथा च धूमवन्निष्ठाभावप्रति
योगितावच्छेदकस्य घटत्वादेर्वह्नित्वादिविशिष्टसंबंधिनिष्ठात्यन्ताभावप्रतियोगिताभावावच्छेदकत्वाद्वह्निमान्
धूमादित्यादौ वह्नित्वादेरपि पारिभाषिकावच्छेदक~~त्वाद्वह्निमान् धूमादित्यादौ वह्नित्वादेरपि पारिभाषिकावच्छेदक~~
त्वापत्तेरिति भावः तादृशेति समानाधिकरणाभावीयेत्यर्थः येन सन्न्यम पाकचूमा हेत्पत्ता भावगर्भेति सामान्यवि
शेषेति स्वव्यापकसाध्यसामानाधिकरण्यजातीयत्वं सामान्यं तत्तत्साधननिष्ठतादृशसामानाधिकरण्यं विशे
षः लाघवमभिप्रेत्य द्वितीयमवतारयति प्रथमेति तथा च साधनवन्निष्ठान्योन्याभावाप्रतियोगिसाध्यसा
मानाधिकरण्यरूपस्य प्रथमलक्षणार्थस्य साध्याधिकरणोद्दयीनिवेशेन गुरुत्वं तदपेक्ष्य लाघवादेव साधनवन्नि
ष्ठान्योन्याभावाप्रतियोगिसाध्यवद्वृत्तित्वपर्यवसितं द्वितीयलक्षणमुक्तमित्यर्थः तद्रूपवान् तत्तत्साध्यादौ एक
व्यक्तिकसाध्यकस्थले अन्योन्याभावस्य प्रतियोगिव्याधिकरणत्वविवक्षया व्याप्तिवारणासंभवादाह

२ ह ७१ क ८ ४९

ता पात

ततार४

नानाव्यक्तीति नानैवव्यक्तिराश्रयो यस्य तादृश साध्यकइत्यर्थः तथाचतत्तद्व्यभेदमादाय वह्निमान् धूमाद्द्रव्यं पृथिवी
त्वादित्यादावव्याप्तिरिति भावः ननु हेतु समानाधिकरणान्योन्याभावप्रतियोगितानवच्छेदकसाध्यवत्त्वविवक्षणा
न्नोक्तदोषइत्यत आह तत्तत्साध्यवत्त्वस्येति तत्तदवच्छेदकत्वादित्यन्वयः तथाचवह्निमान् धूमाद्रूपत्वाद्व्यापकजाति
मान् रूपत्वादित्यादौ ... वह्निमत्त्वावच्छिन्नं भेदं नीलपीतत्वाद्यवच्छिन्नभेदं च आदायाव्याप्तिरिति भावः यद्रूपेति
अधिकरणभेदेनाधिकरणत्वस्य भेदे धूमैकधर्मावच्छिन्नाधिकरणत्वस्यैक्यमते तेदमन्यथावह्नित्वावच्छिन्नवत्व
स्यापि पर्वतादौ नानात्वे तद्दोषतादवस्थ्यापत्तेर्हेतुमन्निष्ठान्योन्याभावप्रतियोगितावच्छेदकत्वसामान्यं यद्रूपान
वच्छिन्नं तद्रूपावच्छिन्नसामानाधिकरण्यपर्यवसितात्पर्यं। ननु यद्रूपावच्छिन्नत्वमित्यत्र यत्पदस्य सखंडरूपत्वे वह्निमान्
धूमादित्यादावव्याप्तिर्वह्नित्वादेरखंडत्वादखंडधर्मपरत्वे च वह्निसंयोगवान् धूमादित्यादौ तत्त थेत्यत आह वक्ष्य
माणेति तद्वदादौ वह्निसंयोगवदादौ वह्नित्वादिकमेवेति तथाच सर्वत्रैव यत्पदेनाखंडधर्मोपादानं व्यवहितिभावः ताद्
दृशेति हेत्वसमानाधिकरणेत्यर्थः नन्वेवं वह्निसंयोगीत्यनुमितिर्न स्यात्तादृशसंयोगत्वस्य व्यापकतानवच्छेदकत्वे
नावृमितेस्तदवच्छिन्नविधेयताकत्वासंभवादत... साध्यसाधनभेदेन व्याप्तेर्नानात्वादनुगतैव साधाव्येत्याह
यदित्यादिना यादृशेति द्रव्यं पृथिवीत्वादित्यादाविति भावः वह्निमान् धूमादिकमभिप्रेत्याह यद्रूपावच्छिन्नमिति अधिक
१ द्धेयसाध्यतादृशान्योन्याभावप्रतियोगितानवच्छेदकत्वमित्येवकर्तव्यमत एवेदं द्रव्यमित्यनुमितौ निरवच्छिन्नद्रव्यत्व

रणत्वमिति शेषः। तेन न प्रागुक्तदोषः एवमग्रेपि वह्निसंयोगवान् इत्यादिकमभिप्रेत्याह यादृशेति कृत्स्नेत्येति रूपादि
साध्यकपृथिवीत्वाद्यव्याप्तेरभिप्रेत्यार्थः। आकिंचित्करत्वाद्व्यधिकरणयोर्व्याप्यभावाप्रयोजकत्वात्पर्यामिति तथा चास
मानाधिकरणपरव्यापकत्वेनैव तादृशप्रतियोगिकत्वोपन्यास इति भावः। व्यधिकरणयोर्दैशिकव्याप्यसंभवात्तादृशव्या
प्तौ युगपदुत्पाद्यविनाशयोरकिंचित्करत्वादाह व्याप्तिरेवेत्यस्येति अर्थांतरत्वमपाकर्तुं भवतारयति अन्योन्येत्यादि
लक्षणास्पष्टैकत्वमविवक्षितं तेन तु भेदस्यापि प्रत्यभिज्ञानात्तत्त्वकारणतिरित्यपहतश्चाचोति अत्र भेदस्याबाधितत्वे चेत्यर्थः।
।अनुभूयमानेति अनुव्यवसीयमानसंयोगिभेदविषयताया इत्यर्थः। यथा शिखरिवनोर्धर्मिणः सत्वेपि शिखरी वि
नष्टेति प्रतीत्याविरोधिनीभूतशिखाया एव सरूपोऽभावो गृह्यते तथा संयोगस्य भेदेपि न संयोगीति प्रतीत्या
विरोधस्य संयोगस्यैवाभावो गृह्यते इति भावः। नन्वेवं गुणेन संयोगीतिप्रतीतेरपि संयोगाभाव एव विषयोऽस्तु
न च संयोगिभेदे तथा च संयोगिसत्त्वादित्यादौ निरुक्तलक्षणातिव्याप्तिरत आह यत्र चेति भेदवत्तत्संयोगिभेदवत् त
दभावस्य च संयोगिभेदाभावस्य तदुपपत्तेरिति एकधर्मिणि संयोगितदभावयोर्निश्चयोपपत्तेरित्यर्थः। वस्तुतः प्रत
समवेतसंयोगिभेदस्याव्याप्यवृत्तित्वोपगमात् वृक्षे संयोगत्वावच्छिन्नभेदसत्त्वेपि न क्षतिरित्यपि तदभावगर्भायाः प्रतियोगप
नाधिकरणत्वेनान्योन्याभावगर्भायामपि व्याप्तौ स्वप्रतियोगित्वावच्छिन्नाभिन्नत्वेन भेदत्वविशेषणाद्दोष घ

तत्त्वा ५
क६

४२

तीतभम

अषिद्धेरिति मूलावच्छेदेन भेदस्यैव प्रत्ययात्तादृशाभिन्नज्ञानस्यैवासिद्धेरित्यर्थः। तथा च स्वरूपबाधः विषयताधर्मप्रा
ह असिद्धेरिति मूलावच्छेदेन भेदस्यैव प्रत्ययात्तादृशाभिन्नभेदज्ञानस्यैवासिद्धेरित्यर्थः। तद्भवावच्छिन्नेत्यादिना प्र
तियोगितावच्छेदकधर्मस्याभिन्नभेदत्वं न हि घटत्वं च रामित्यत आह नहीतिनदघटत्वस्यैकत्वेन घटाभिन्नभे
दत्वोपगमेपि संयोगव्यक्तीनामनेकत्वात्तेषु संयोगिभिन्नभेदत्वापेक्षया लाघवादतिरिक्त एव संयोगिभिन्नभेदो
युक्तः तृतीयाच्च तथात्वेपि तस्याव्याप्यवृत्तित्वादन्यथा मूले वृक्षः कपिसंयोगिभिन्नो नेति प्रमापत्तेरिति भावः सर्व
त्र नानाप्रतियोगिकाभावाभावस्थले॥ अत एवेति परास्तमित्यग्रेतनेनान्वयः अयोरतात्ताभावप्रतियोगिनोसवि
रोधः संकोच्यतो अशतोक्षम विषयत्वेन कल्प्यतां ननु मूले वृक्षेन संयोगवृत्तिप्रतीतेः संयोगवद्भेद
विषयकत्वमेव कल्प्यताद्वयोः संकोचे मानाभाववत्त्यत आह नहीति संयोगस्यैव तद्वत्तोपि किंचिदुपास्थितिसंभवा
नियमतदुक्तं अनुपास्थितिरिति तत्र चकारणाबाधादेवतादृशप्रतीतेर्न संयोगिभेदावगाहित्वमिति भावः
अनुभववाधकमप्याह प्रतियोगीति अभावांशे साक्षात्परम्परया वा प्रकारकत्वेन संयोगवतोऽनुव्यवसायेना
ग्रहणाच्चेत्यर्थः भासमाने प्रायुपस्थितेर्यद्धि वो घटं संयोगस्तदभावविषयत्वेनेत्यर्थः अंतिम गोरत्वात्प्रभा
भावप्रतियोगितावच्छेदकयोः संकोचतामित्यर्थः इति पूर्वेणान्वयः विशेषएव वृत्तिघटभेदघटत्वादीना

४३

वनारा२

~~वनारा~~

कपिसंयोगी एतद्वृक्षत्वादित्यादावव्याप्यस्य संभवात् न चैवं न चान्योन्याभावस्येत्यादि मूलासंगतिः कपिसंयोगित्वावच्छिन्नभेद
स्यैव कपिसंयोगिभेदप्रतियोगितावच्छिन्नभेदस्यापि मूलावच्छेदेन वृक्षे सत्त्वमाभंक्ते तद [illegible] अभेदस्येत्यादि
मूलस्यापि कपिसंयोगिभेदप्रतियोगितावच्छिन्नाभेदस्य वृत्त्यर्थकत्वादित्यस्मद्गुरुचरणाः ननु भेदस्यात्यंताभावो
न प्रतियोगितावच्छेदकीभूतसंयोगिस्वरूपो येनाव्याप्यवृत्तेस्तस्य भेदेनाविरोधो न स्यात् किं त्वतिरिक्त एवेति तद्वि

६५

रोधो दुर्वार इत्यत आह यथा हीति ननु यत्र [illegible] ज्ञाने यदत्यंताभावग्रहस्तस्यैव तदत्यंताभावविशेष्यत्वे प्रतियोगिव्याप्य
स्यापि तथात्वापत्तिरित्यत आह अभावेति तदत्यंताभावव्यवहारार्चेत्यर्थः स एव प्रतियोगितावच्छेदकावच्छिन्न एव
न तु वृक्षाणां संयोगव्यक्तीनां विषयभेदाभावकल्पने गौरवाद् भावत्वं प्रतीतिः प्रमात्वानुरोधेनातिरिक्त एव
संयोगिभेदाभावकल्पनेत्यत आह आधिक्येपि च अव्याप्यवृत्तित्वादिति तथा च एकत्र भेदतदभावयोः संभवा
न्नामियो बाधकत्वमिति भावः । अत एव भेदस्याव्याप्यवृत्तित्वादेव तथा भेदवाधकं असंभवादिति कपिसंयोगस्याति

कपि३

रिक्तस्यैवासंयोगिभेदाभावे मूलावच्छेद्यत्वासंभवादित्यर्थः । न यथाचोक्तप्रतीतेर्विषयबाधः स्याद् रूपबाधमस्याह अ
सिद्धेरिति मूलावच्छेदेन भेदस्यैव प्रत्ययमान्मूलो वृक्षः कपिसंयोग्याभिन्नत्वप्रतीतिज्ञानस्यैव सिद्धेरिति अर्थः ज्ञा
नामितितथेति पूर्वेणान्वयः एवमग्रेपि तद्वृत्तित्वस्यैव वृक्षवृत्तित्वस्य वत्तज्ज्ञानं कपिसंयोगिभेदभिन्नज्ञानं

स्य३

संसर्गत्वमतस्तैनेव घटाभावविषयनीलादिप्रतत्यमवृत्तिनेयं विशिष्टभेदमित्यस्यानेरत्वेनेति निधेयः कश्चानितताद्र सा
तीर्गतन्तताभावबत्वान्नुल्लेरवादिति भावः प्रकोटे विप्रत्ययस्यान्यावगाहित्वोपगमेप्रमामात्रस्योच्छेदः इत्याह नत्व
त्वेति बाधके: कारणबाधादिभिर्वाबपतइति अन्यथा तु त्तौरज्ञतत्वादिप्रतीसपत्ना पाद्दिचात्य थाख्याती निरसने
नाज्ञितं प्राभाकरैरिति भावः तस्यानसंयोगीति प्रतीतिविषयइति स्वरूपवृत्तिसंयोगनिष्ठप्रतियोगित्वसंबंधेनैव संयोगिनो
भेदप्रकारकत्वादिति भावः अग्रइतिनतुसंयोगभेदपर्यवसन्नास्यउक्तपरम्परयासंयोगिभेदस्यैवाप्यवृत्ति
त्वं वाच्यमित्यत आह स्वमतइति पिठरपाकानभ्युपगमेरक्तघटस्यान्यत्वं व्याप्यवृत्तेवाउक्तं दंडादीविशेष्यामपद
स्य गुणेपि शक्तत्वान्नदत्यंताभाववोधनेधर्मोपसर्जनत्वमितिवंधत निराकांक्षत्वासंभवात् आह दंडादी [illegible]
त ॥ व्यवहाराः प्रमाणांइति शेषः तत्र घटो न श्यामइत्यादौ विशेषणस्य श्यामत्वदंडादेः अनुयोगिनीति [illegible]
संसर्गाभावबोधनेतदर्थकपदोत्तरस्य [illegible] त्वादिति भावः तदिदं दूषयति नत्वित्विति नञुक्तस्थले संसर्गाभा
ववोधने काक्षतिरस्त्यित आह तथाविचेति प्रसंगादिति घटात्यंताभावस्य सत्वादिति भावः नतु यत्र नञो [illegible]
तियोगिनामनुयोगिनोः साकांक्षत्वं तत्रैव नञा अभावोवोधते प्रकृते च घटो घटइत्यस्य निराकांक्षत्वा [illegible] ७८

विरोधस्य स्फुटत्वेपि संयोगतादात्म्ये दयोः तथात्वे मानाभावात् तदव्याप्यवृत्तित्वे बाधकाभावः ननु संयोगिभेदो नाव
च्छिन्नवृत्तिकः अन्योन्याभावत्वात् घटभेदवत् इत्यनुमानात् संयोगिभेदस्याव्याप्यवृत्तित्वासिद्धेः वृक्षे वृक्षः संपन्न
एव संयोगेन समं तस्याविरोधः संयोगिभेदो न योगवृत्तिः संयोगिभेदत्वात् घटाद्यभाववत् इति व्याप्तिरेकि
णावात् तस्याव्याप्यवृत्तित्वं साध्यम् इत्यत आह अत्यंताभावेतित्र वाछितेति विभिन्नावच्छिन्नेत्यादिः तथा च संयोगिभे
दो ऽवच्छिन्नवृत्तिकस्तत्वेन प्रमीयमानत्वात् इत्यनेन प्रतिबंधादवच्छिन्नवृत्तिकत्वाद्यभावकतोंऽतिस्यानमेवद्दुः
ष्टकामिति भावः मूले वृक्षो न संयोगीति प्रतीतेः शिखी विनष्ट इति वक्ष्यमाणविशेषणाभावविषयत्वं तदुक्तं त
त्र दृष्टांतवैकल्यमाह किंचेति विशेष्येति शिखिनि तद्बाधात् साक्षात् तद्ध्वंसबाधात् विशेषणध्वंसप्रतीतिः तथा च शिखी
विनिष्टः ...वृत्तिशिखानष्टप्रति... योगित्वरूपपरम्परासंबंधेनैव शिखिनो ध्वंसे प्रकारत्वमित्याशयः –
...ध्वंसस्यापि परम्परया शिखी विनष्ट इतिवत् प्रत्यक्षो विनष्ट इति अपि प्रतीतिः स्यात् इति वाच्यं तत्र हि विशेषणध्वंस
...तत्र हि ...विशेषणाद्यवच्छिन्नस्य पश्चात् निरूपकपरम्परया संसर्गत्वादिति अत एवायं घटः श्यामो भविष्यतीति आ
...श्यामरूपानिरू... प्रतियोगितायाः प्रागभावे श्यामरूपाभावस्य वच्छिन्नस्य संसर्गत्वेपि न घटत्वविशिष्ट

टपटौ न स्त इत्यादि प्रतीतेर्घटत्वादिप्रत्येकधर्मावच्छिन्नाभावागोचरत्वे भूतले घटो न वेति संशयो न स्यात्तदा धर्तिश्चयसत्वा वि-
त्वप्ये: द्वित्वेण द्वित्वावच्छिन्नाभावस्य निर्णयदशायां सन्निकृष्टत्वेन घटत्वादिप्रत्येकधर्मावच्छिन्नाभावस्यावश्यं निर्णा-
य इति तदानीं संशयानुत्पादस्य सर्वसिद्धत्वात् शुष्कादिनेति उक्तं । नच घटपटौ न स्त इत्यादि प्रतीतौ द्वित्वाश्रयवृत्तिघटत्वा-
दिरूपेणैवाभावस्य निर्णयात्तदानीं भूतले घटो न वेति संशयो बाधकाभावी ... घटत्वप्रकारेणाभावनिर्णयस्यैव तद्वि-
रोधित्वादत आह विषयेति । घटपटोभयस्याभावानानुगतत्वादिति भावः विशेषणानुगतावच्छेदकानुगमात्वघटपटौ न
स्त इति प्रतीतेरनुगताकारत्वमित्याशंकते नचेति द्वित्वाधिकरणेति तथा च घटपटपर्याप्तद्वित्वाश्रयप्रतियोगिताका-
भावत्वेनैव घटादिप्रत्येकाभावस्यानुगमः ननु घटपटौ न स्त इति प्रतीतेः कुत्रचिद्भेदावच्छेदकत्वावगाहित्वस्यानुभवसि-
द्धत्वान्नोक्तक्रमेणात्त निर्वाह इत्यत आह द्वित्वसमानेति मात्रपदेनाति द्वित्वस्यावच्छेदकत्वव्युदासः उभयमित्यस्य घटप-
टौ इत्यादिः शंकां निरस्यति तथा च यत्किंचिद्घटपटोभयस्त्वन्यघटपटोभयवत्यपि घटपटौ न स्त इत्यपि प्रतीत्यापत्तिरिति भी-
वः नव घटत्वपटत्वान्यतरनिरूपितसमवायेनैव घटपटौ न स्त इत्यत्र धर्मस्य द्वित्वसामानाधिकरण्यं निवेश्यमेवं कुड्यकु-
ड्यौ न स्त इत्यादावपि यथायोग्यं तत्र द्रष्टव्यं अतो द्वितीयकल्पेनायं दोष इत्यत आह द्वित्वसमानेति अत एवेति यदनुप-
स्थितिदशायां यादृशप्रतीतिस्तदवगाहित्वस्य तादृशप्रतीतावसंभवादेवेत्यर्थः परं परेति स्वपर्याप्त्यधिकरणवृत्ति

ज्ञा ४६

घटस्य भेदवत् संसर्गाभावोपि न बोध्यते कंबुग्रीवादिमान् घट इत्यादिकं तु भूतलं न घट इत्यादिनासम्भूतलं इत्य
तत्राह अपि चेति विशिष्टवाचके तिवैयाकरणमतेनेदं। यद्वा वाक्यार्थमर्यादया विशिष्टबोधके त्यर्थः दंडी त्या
दिवाक्ये तवाचकत्वासंभवात् धर्मीति मतुमर्थसंबंधिनि विशेषणतयोपस्थितइत्यर्थः उपस्थितस्येत्यस्य वृत्ति
शब्दादित्यादिः तेन नीलो घटः श्चपटश्चेत्यादौ घटविशेषणतोपस्थितस्यापि नीलादेः घटेन्वयो नीलघटश्चपटश्चेत्या
दौ तु वृत्तिशब्दे विनीलस्य [illegible]पस्थितिरतः पटे तस्य नान्वयः विशेषणमात्रस्य तथा च चैत्रो न दंडीति अत्र भगु
पः पदसाधुत्तामात्रं फलं न तु शाब्देन दर्थ[illegible]प्रवेशइति भावः दुर्वारत्वादिति यद्यपि भूतलं न घट इत्यत्रेव चै
त्रो न दंडीत्यादौ पूर्वपक्षे दंडात्यंताभाववद्विषयापत्तिः कर्तुं शक्य एव तथापि तन्नामार्थस्य न आत्यंताभाववो
धने तत्त्वात् प्रथमांतत्वं प्रथमासाकांक्षत्वं वा तंत्रं अन्यथा गृहे दंडस्यानेत्यत्तोपि दंडात्यंताभावप्रतीत्याप
त्तेः अतश्चैत्रो न दंडीत्यादौ दंडपदस्य प्रथमांतत्वस्य प्रथमाकांक्षत्वस्य चाभावात्तदत्यंताभाववोधो न भा
त्व
दुर्घटः चैत्रमैत्रयोर्दंडधरौ नेत्यादि यथासंख्यस्थले चैत्रधर्मिकदंडात्यंताभावप्रतीत्यापत्तेः प्रथमांतस्य
व्यभिचारेपि प्रथमाकांक्षत्वभस्येव हृद्दो तत्र प्रथमायाः सफलप्राकृत्यर्थान्वितत्वात् एतेनेति चैत्रो न दंड

जलत्वविरुद्धत्वादित्यादिक्रमेण जलत्वे स्नेहवत्वाद्वह्निमान्धूमादित्यादावव्याप्तिरित्यपरस्य रसेनवदंतीत्युक्तं सां
प्रदायिकास्तु भावभिन्नेत्यस्य वास्तवात्यंताभावो ग्राह्य इत्यर्थस्तेन रूपध्वंसात्यंताभावाच्छिन्नाभावानां रूप
ध्वंसात्मकानां भावभिन्नानां जलत्वसामानाधिकरण्याभावेपि जलत्वे स्नेहवत्वादित्यत्र नाव्याप्तिः तद्वस्थैव न
नु घटध्वंसो ध्वंसत्वादित्यत्रातिव्याप्तिरभावप्रतियोगिकाभावभावस्याधिकरणस्वरूपतया घटात्यंताभावा
दिवृत्तेर्घटध्वंसाद्यभावस्य च [struck through] घटात्यंताभावादिरूपस्य घटध्वंसत्वस
ध्यसामानाधिकरण्यात् घटध्वंसादिनिष्ठस्य च घटध्वंसत्वाभावस्य घटध्वंसात्मकस्य वास्तवात्यंताभा
वत्वविरहेण लक्षणाघटकत्वादिति घटध्वंसेत्यादीत्याहुः तन्मंदं अभावप्रतियोगिकाभावानां अ
धिकरणस्वरूपतामाशंक्य घटध्वंसेत्यादेरेववारणे धूमनिष्ठाभावप्रतियोगितावच्छेदकीभूतघटध्वं
सत्वाभावस्य द्रव्यत्वाद्यभावनिष्ठस्यापि तुल्ययुक्त्या द्रव्यत्वाद्यभावात्मकस्य वह्निसामानाधिकरण्याभा
वाद्वह्निमान्धूमादित्यादावव्याप्तेरेवसंभवे घटध्वंसो ध्वंसत्वादित्यादावव्याप्तिपर्यंतानुधावन
स्यसंदर्भविरोधापत्तेः। न व्याप्तभावभिन्नेत्यत्र भावभिन्नप्रतियोगिविधयासंभिन्नो भावमात्रप्रतियोगिक इति या
वत् तेन स्नेहवत्वसामानाधिकरण्यसाहिमाशून्यस्वरूपाभावस्य प्रतियोगितावच्छेदकं यद्धिमास्त्वेरभावत्वं तद

ति॰

वह्निना

द्वय॰ ... व्यसमानाधिकरणाद्

स्यप

पञ्च

व्यस्वतात्पर्या

यप्रतियोगितावच्छेदकीभूत तादृशधर्मावच्छिन्नाभावो अपि इति ... असमतात्पान्त वस्य सामान्याभावावच्छि
न्नावच्छेदेन भावभिन्नत्वं रूपएव व्यभिचारात् अत एव रूपप्रागभावसामान्याभावत्वावच्छिन्नाभावस्वरूपात्मक
रूपप्रागभावान् प्यादाय न दोषः तादृशप्रागभाव सामान्याभावत्वावच्छिन्नाभावत्वावच्छेदेन प्राचां मते भावभिन्न
त्वविरहस्य रूपस्यापि तथात्वादिति भावः ननु घटध्वंसे वा न ध्वंसत्वादित्यत्रातिव्याप्तिः घटध्वंसत्वस्य ... म
न्निष्ठाभावप्रतियोगितानवच्छेदकत्वेपि तदवच्छिन्नाभावभिन्नत्वविरहेण घटध्वंसत्वसामान्याभावस्य तस्य ल
क्षणाघटकत्वात् अन्याभावत्वलक्षणध्वंसत्वस्य पल न्यं ... भावभिन्नत्वस्वरूपत्वाद भावप्रतियो
गिताभावभावस्यैव चाधिकरणस्वरूपोपगमात् भूतलादिनिष्ठस्य ध्वंसत्वाभावस्य भूतलादिभावे पर्यवसानात्
घटत्वाद्यवच्छिन्नाभावस्य च तथाविधयाभावस्य साध्यसामानाधिकरण्यपादत आह घटध्वंसइति भावाभावश्चेति
श्चेति तथा चाभावनिष्ठत्वम भावप्रतियोगित्वं च अधिकरणस्वरूपत्वे तं चमपि तु तत्तद भावमात्रानिष्ठत्वं खेनैव तादा
त्म्येन स्वमा वच्छन्याभावस्याविशिष्टं ... पत्तौ तत्तदभावभिन्न त्वाद्यभावस्यातिरिक्तस्य कल्पने मानाभावादिति भा
वः ... सामानाधिकरण्य भावप्रतियोगितावच्छेदकं यत्तेजस्त्वाभावसत्वाभावान्यतरत्वावच्छिन्नाभावत्वं
तदवच्छिन्नप्रतियोगिताको यो निरुक्ताभावाभिन्नाभावको तेजस्त्वाभावश्च तयोर्न्ने साध्यसामानाधिकरण्यं सत्वाभावस्य

को॰ शि॰ १२

वां ७

सत्त्वाभाव १

व्यसमरूपो १

तादृशावच्छिन्नयावादित्प्रतियोगिताकस्येत्यत्राप्यसिद्धिरित्यग्रेणान्वयः ननु तादृशयावत्प्रतियोगिकोयावत्त्वाद्यवच्छि
न्नाभाव एव प्रसिद्ध इत्यत आह हानि प्रसंजकादिति तथा च यावत्त्वाद्यवच्छिन्नतादृशाभावमादाय धूमवान् वह्नेरित्यत्राति
व्याप्तिभिया यावत्त्वाद्यवच्छिन्नाभावस्य लक्षणाविशेषणमिति तदप्रसिद्ध्या वह्निमान् धूमादित्यादावव्याप्त्यसंभव इति
भावः ननु द्वितीयात्यंताभाव एव यावत्त्वेन विवक्षितः समासनिविष्टेनापि तेन व्युत्पत्तिवैचित्र्याद्यावत्त्यदस्याभेदान्व
यबोधकत्वसंभवादत आह तादृशावच्छिन्नेति तथाप्रसिद्धिस्तथावतत्तत्पर्वताद्यन्यत्वाभावकूटाधिकरणाप्रसि
द्ध्या नानावृत्तिसाधनके द्रव्यं पृथिवीत्वादित्यादावव्याप्तिरिति भावः ननु द्वितीयात्यंताभाव एव यावत्त्वेन विवक्षितः
समासनिविष्टेनापि तेन व्युत्पत्तिवैचित्र्याद्यावत्त्यदस्याभेदान्वयबोधकत्वसंभवादत आह तादृशावच्छिन्नेति तथा
प्रसिद्धिस्तथावतत्तत्पर्वताद्यन्यत्वाभावकूटाधिकरणाप्रसिद्ध्या नानावृत्तिसाधनके द्रव्यं पृथिवीत्वादित्यादाव
व्याप्तिरितिभावः वाच्यं गगनत्वादित्यादावेकवृत्तिसाधनके तादृशयावदभावत्वं साध्यतावत्येव प्रसिद्धिमतः प्राप
शङ्कते ननु तादृशयावदभावानां प्रत्येकाधिकरणवृत्तित्वं साध्यवाच्यमतो नोक्तप्रसिद्धिरत आह रूपादीति ता
दृशेति तत्तत्स्थरान्यत्वाभावकूटस्यापि निरुक्ताभावतया तत्प्रत्येकसामानाधिकरण्यस्य कुत्रापि रूपेऽसत्त्वादत च
तादृशाभावानां प्रत्येकाधिकरणवृत्तित्वं साध्यवाच्यमतो नोक्तप्रसिद्धिरत आह रूपादीति तादृशेति तत्र घटाद्य

घनप भेद ६ ष्टति २

घटान्यत्वाभावकूटस्यापि निरुक्ताभाववत्तयात्तत्प्रत्येकसामानाधिकरण्यस्य कुत्रापि रूपेऽसत्वात् न च तादृशयाव
वदभावानां प्रत्येकाधिकरणावृत्तित्वं साध्यतावच्छेदकस्य वाच्यं अतो नोक्तदोषः दंडिमान् दंडसंयोगादित्यादावेवम
व्याप्तेरिति भावः यद्यपि तादृशयावदभावानां प्रत्येकाधिकरणायद्धर्मावच्छिन्नाधिकरणे हेतोस्तदवच्छिन्नस्य सामा
नाधिकरण्यविवक्षायां नोक्तदोषः तथापि एतस्यैव फलितत्वे कल्पान्तरेण सिद्धान्तग्रन्थे वक्ष्यमाणत्वान्नाशंकितमिति भावः
न च यावन्तः साध्यवन्हित्वाभावप्रतियोगिता यत्समानाधिकरणाभावप्रतियोगिनि वृत्त्यस्यैव सम्यक्त्वेऽवच्छेदकत्वोपा
दानं व्यर्थमतः पिंडस्यैव साधनताव्यापकौ साध्यसाध्यवन्हित्वाभावप्रतियोगित्वविरहात् धूमवान् वन्हेरित्यादौ सोपाधौत्र
तिव्याप्त्यभावात् तत्राह सर्वत्रेति घटमात्रे इति साधनं वृत्ति घटत्वादि विशिष्टत्वेनेत्यर्थः विशिष्टस्यातिरिक्तत्वे शुद्धाप :
पिंडत्वेनैतस्य विशिष्टाभावप्रतियोगित्वासंभवात् तत्राह आदिनेति तेन घटत्वाद्यवच्छिन्नेतदन्ताभावस्य संग्रहः अत्र साधनवन्हित्वा
भावप्रतियोगिता यावत्यः साधनवन्हित्वाभावप्रतियोगिता स्वरूपईदृश्यो नैषदोषः तन्नायः पिंडभेदत्वावच्छिन्नप्रतियो
गिताव्यक्तेर्धूमवान्हित्वाभावप्रतियोगितानात्मकत्वादतिव्याप्त्यसंभवात् इति ध्येयं मतान्तरमाह साधनसमानेत्यादिना अ
भावायद्धर्मावच्छिन्नेति तादृशप्रतियोगिकात्यन्ताभावाः समानाधिकरणा यस्येति बहुव्रीहिः न व्याप्तिरिति नवरूपसामा
न्याभावाभावस्य रूपद्वयं सप्रागभावयोरपि प्राचीनमते सत्वात्तयोश्चाभावाभिन्नयोरपि निखिलयोर्जलत्वसमानाधिकरण्या
भावादेवमप्युक्तावप्रसिद्धतादवस्थ्यामिति वाच्यं यद्धर्मावच्छिन्नाभावत्वानवच्छेदेन भावाभिन्नत्वं हेतुभिन्नत्वाभा

दृव२ तथाच३

संबंधेनेत्यर्थः तादृशद्वित्वेति घटपटवृत्तिद्वित्वेत्यर्थः ह्याविसस्य घटपटाद्वित्वादित्यर्थः द्वयोः प्रतियोगित्वोल्लेखे
विप्रतिपन्नं प्रत्याह द्वित्वादेरिति घटपटयोर्द्वित्वमित्याप्रत्यक्षे तुल्यवृत्तिवेद्यतया द्वित्वे घटपटवृत्तित्वावगाहनेपि नि
यंत्रितविषये शाब्दस्थलेतदसंभवादस्माकं तु नीलघटो नास्तीत्यादौ नीलत्वघटत्वाभ्यामिव घटपटौ न स्त इत्यादि
शाब्दबोधस्थले घटत्वपटत्वाद्वित्वैकावच्छिन्नप्रतियोगिताकस्यातिरिक्ताभावस्य बोधनानानुपपत्तिरवच्छेदकत्वस्य
उभयत्रैवपर्याप्तत्वादिति भावः अत एव वैशिष्ट्यानुपस्थितावप्युक्तप्रतीतेरेव। नन्वेकविशिष्टापरत्वमे
वोभयत्वं प्रतिवैशिष्ट्यानुपस्थितौ घटपटौ भयं नास्तीति प्रतीतिरसिद्धैवेत्यत आह विरुद्धयोरिति उक्तत्वादुक्तप्र
यत्वात् तेन घटत्वपटत्वयोरेवावच्छिन्नाभावस्य प्रतीतेः। सिद्धांतनिरुक्तावृत्तत्वेपि न क्षतिः। उक्तं तस्य घटत्वा
वच्छिन्नाभावस्यैव प्रतियोगितावच्छेदकाद्वित्वमित्यंतकल्पं निरस्यति नात्यद्भुतितथात्वेपि द्वित्वादेः उक्तपू
प्रत्येकाभावप्रतियोगितावच्छेदकत्वेपि तादृशातिसाधनत्वनिश्चयात्तत्तान्योन्याभावेत्यर्थः नन्वेतच्छेषमभियाव
रं साधयतावच्छेदकातिरिक्तव्यासज्यवृत्तिधर्मावच्छिन्नत्वेतिप्रतियोगित्वं विवक्षितं तावता [illegible]भ्युपगमेवेति
ग्रंथेनातिरिक्तमभावमंगीकृत्यासिद्धांतोग्रंथकृतोनोचितमित्यत आमपि व्यवस्थापयति अंतरेणाचेति ५
अभावांतरमिति घटत्वाद्यवच्छिन्नप्रतियोगिताकमित्याहः तथाच न घटत्वावच्छिन्नाभाव न तत् न्य

त्रि॰ ५

थासिद्धिः घटद्वयेत्तित तथा च तत्तद्घटत्वावच्छिन्नाभावेनापि न तद्वयथासिद्धिरिति भावः यद्यपि याव
तो घटाः प्रत्येकं तदवच्छिन्नघटत्वावच्छिन्नाभावेषु तेषु घटद्वयत्वावच्छिन्नप्रतियोगिताकत्वकल्पने
घटद्वयवति घटेऽनस्तित्वस्यनाप्रसंगः नवा एकघटवतितादृशप्रत्ययाप्रसंगस्तथाप्यनंतेषु भावेषु तादृ
शप्रतियोगितात्वकल्पनमपेक्ष्य तथाविधप्रतियोगिताकत्वे नैकस्यातिरिक्ताभावकल्पने एव लघीयसी सा
मान्याभावस्थलद्वयुक्ते रेतोल्पादिति भावः ननु साध्याघटितोभयस्य प्रतियोगित्वे सुतरां साध्यस्यापि तथा
त्वादित्यत आह यामित्यादि मूल्ला संगतिरत्ताव्याचष्टे तद्रूपत्वामिति तथा च भावप्रधानो निर्देशः ननु तथाप्यप्र
तियोगित्वगर्भाणि यथाश्रुतलक्षणानि व्याप्तान्येवेत्यत आह तादृशमाशुत्तिततथैवेति प्रतियोगिपदस्य प्रति
योगितावच्छेदकपरत्वादिति भावः केचित्तु प्रतियोगितानवच्छेदकत्वगर्भेषु समस्तलक्षणेषु प्रतियोगिता
नतिरिक्तवृत्तित्वरूपस्तदवच्छेदकमभिप्रेत्य शंकितं मूले अथेति स्वरूपसंबंध एवावच्छेदकत्वं निविष्टमित्या
शयेन परिष्कृतं अभ्युपगमेतितद्रूपत्वमित्यादौ च सर्वत्र धर्मपरो निर्देशः इत्याहुः ॥ स्वपदस्य साध्यपरत्वे
व्यतिरेकिणी व्याप्तिरत आह स्वमिति यथाश्रुतार्थसंगती जमाह एतेनेति प्रागुक्तमित्यग्रेणान्वयः
तादृशेः साधनवन्निष्ठाभावप्रतियोगितावच्छेदकैः अवच्छिन्नस्यात्यप्रसिद्धिरित्यग्रेणान्वयः तथा च
यावत्त्वं नावच्छेदकविशेषणमिति भावः तादृशावच्छेदकावच्छिन्नस्यापि यावत्त्वं नाविशेषणमित्यपी ह ५

ह ४

है ५०

६२-७७

त्यर्थः ननु निमित्तमस्तीति ननु दोषात्मकं यत्किंचित्कारणमस्तीति कल्पेविशेषस्तथा च कारणांतरविरहाद्वारोपस्य
लीयासंसर्गाग्रहस्वरसभांतरेनास्तीति तत्र व्याप्यत्वव्यवहार इति भावः इत्थं चेत्यत्र वशात्त्वस्य व्याप्तिघटकत्वे म
ज्ञानसमानाधिकरण्यघटितस्यापि व्यापकत्वस्य वक्ष्यमाणदोषप्रत्यक्षसंभवादस्मिन्निति शिरोमणौ यथेत्तः पश्चादुक्तमप्यवगमात्वं
प्रागेव स्वरूपकीर्तनमिह तत्व्याख्यातमिति विशेषं नवीनानामिप्रियनिष्ठसे तन्महानसनिष्ठाभावप्रतियोगित्वस्याप्यागत्वा
त् तदभावः कथं योगपद्यत्य तत्राह महत्तीति तादृशेति एतन्महानसनिष्ठाभावीयेत्यर्थः नव प्रतियोगितावच्छेदकत्व
सामान्याभावस्य व्याप्यघटकत्वान्नजह स्पष्टः शाकत्वं न क्षतिवरमतो व्याचष्टे न प्रतियोगिकेति । साधनाव्यापके इति न
धूमाव्यापकत्व पर्वतत्वव्याप्यत्वस्य प्रत्यक्षवह्नौ सत्वादव्याप्तिः साध्यतावच्छेदके साधनाव्यापकव्याप्यत्ता व
च्छेदकत्वाभावस्य विघाक्षिप्तत्वानधिकरणस्वरूपमेवेति तथा च तादृशसाधुसंबंधरूपव्याप्तिः प्रथमतो ग्रंथेन ः प
भावः प्रथमं वितर्कितोपाधेरन्तावरूपां व्याप्तिं परिष्कृत्य पश्चाद्वितर्कितोपाधेरत्तावमेकां व्याप्तिं परिष्कर्तुं पश्चाद्वि
तर्कितोपाधेरन्तावमेकां व्याप्तिं परिष्कुर्वन्नाह साध्यतावच्छेदकातिरिक्तावच्छेदकावच्छिन्नाभावो पीति अधिकरणस्वरूपमि
त्यनुपपत्तेः न च साधनतावच्छेदकातिरिक्तेन तत्र धूमत्वादिना प्रकारोपेतं यावच्छेदानुक्तौ मानधूमादित्यादावसंभ

तत्पर्याप्त्यधिकरणत्वेनेति व्याप्तिस्वरूपस्य निरुक्तहेतुसत्वा[त्] न ... न चैवं लिङ्गसाधनं एतद्दोषस्याग्रे साम
नाधिकरण्यमात्रस्य तु तत्पर्याप्तत्वमित्यादिना दीधितिकृतैव प्रदर्शनीयत्वादिति भावः इष्टापत्तिरिति अधिकरण
स्वरूपव्याप्तेः प्रथममेव निर्णीतत्वादिति भावः तदग्रहमात्रेणोपाध्यग्रहमात्रेणं स्थले वह्नौ काचिद्विद्यमानो
धूमादौ नज्ञातत्वइतिशंकया सामग्र्या गृहीतव्याप्तावपि संशयवृत्तिको विद्यमानइति मूलस्यार्थः उपाधेरनुप...
तावदुपाध्यन्तरावत्वप्रकारेणातिधायस्य प्रथमदर्शनेतु घटत्वान ... पूरयतिसन्नुपाधीति। अथ वा प्रथमदर्श
ने निश्चितस्य व्याप्तिस्वरूपस्यैव संशयापादकतायाम् इत्यादि मूलसंगमात् पूरणं व्यर्थमित्यस्वरसादुक्तं चर
णाः। मूले क्वचिदित्यादि क्वाचित्कस्य भेव्याप्यत्वव्यवहारो दोषाधीनात् संसर्गाग्रहाधीनात् संसर्गाग्रहा
दित्यर्थः अन्यथापि तथेति मूलस्य धूमेपि दोषाधीनासंसर्गाग्रहाद्व्याप्यत्वव्यवहारस्यातिनार्थस्य तथा सति सिद्ध
त्तिनतु निमित्तमित्यादिना दोषरूपस्य निमित्तस्य सत्वेपि व्यापकत्वानासंगच्छते: अन्तोव्याव्यवहरे सर्वत्र संसर्गाभावादिति
व्याप्यत्वेन व्यवहर्तव्यलिङ्गेतरत्वेन व्यवहर्तव्योपि संसर्गाभावस्य यः विषयाभावरूपस्य दोषस्योभयत्रापि तुल्यत्वादसंस
र्गाग्रहरूपस्यारोपस्य तत्रापि न संभवादिति भावः इत्थं च मूले निमित्तानुसरणमित्यस्य सामग्र्यनुसरणमिति

लेपिकायपूरुषसदृशायां

सत्वसंशयोनतुनिश्चयः इत्यादिकं हेत्वाभासादेवेक्ष्यतेइत्यर्थः साधनगोचरेतिसाधनविशेष्यकेत्यर्थः
ग्राह्येतिसाध्याभाववद्वृत्तित्वरूपस्य ग्राह्यत्वाप्रसिद्धेरित्यर्थः ननु चभावे साध्यवत्त्वावगाहि प्रमेयत्वाभा
ववद्वृत्तित्वहेयत्वमित्याकारो व्यभिचारग्रहः केवलान्वयिस्थले संभवत्येवेति अत आह एवंशङ्कते कु
चित्साधनेसर्वत्रेतित्तथाच यत्रसाधने साध्याभाववद्वृत्तित्वभ्रमोनजातस्तत्रैव व्यभिचारज्ञानाभावस्यव्याप्ति
धीहेतुत्वमसंभवतीतिभावः तादृशग्रहे साधनवद्वृत्त्यभावप्रतियोगितावच्छेदकत्वग्रहे तथापीतिननुपुरुषीय
त्वहेतुमन्निष्ठाभावप्रतियोगितानवच्छेदकत्वबुद्धौतादृशावच्छेदकत्वबुद्धौ तादृशावच्छेदकत्वबुद्धेः समान
विशेष्यताप्रत्यासत्त्याप्रतिबंधकत्वान्नायोक्तसाध्यतावच्छेदकव्याप्तिः एकस्य पुंसो वाच्छिन्नत्वे तादृशप्रतियोगितावच्छे
दकत्वग्रहे अन्यस्य तादृशप्रतियोगितानवच्छेदकत्वग्रहार्थमाह ननुपुरुषीयधीधतिश्चयेप्यन्यस्यात्मनः प
रपुरुषप्रवेशन्यायेन विशिष्टधीः प्रामिति। कीनस्यतत्त्र। शरीरावच्छिन्नत्वेत ननुपुरुषीयत्वस्य विवक्षणीयं विष
यत्वयेति यद्यपि घटत्वं तादृशप्रतियोगितावच्छेदकोलेपिकायपुरुषसदृशायां भ्रमस्य कलानुवेकशरीरावच्छेदे
नतादृशावच्छेदकत्वानिर्णयेप्यन्यशरीरावच्छेदेन तादृशावच्छेदकत्वोपगमे पुरुषपदं शरीरार्थकं। यदि चैकदेहाव

व: साधनतावच्छेदकीतिरिक्तोमात्रावच्छेद्यत्वाभावस्याविवक्षितत्वात् तन्तुत्वस्यापि ह्यग्रेणान्वय: तथात्वं सकद्द
र्शनगम्यत्वं नवारयामइतितथाच प्रकारतत्तयानुमितिजनकतापर्याप्त्यधिकरणत्वेन पक्षत्वेवाध: ताद्द
शजनकतावच्छेदककोटिप्रविष्टत्वेन पक्षत्वेच सिद्धसाधनतामिति भाव: ननुविशेषादर्शनकोट्युपस्थिति
धर्मिज्ञानादिसमुदायस्यानिश्चयप्रतिबंधकत्वेन समवायेन विशेषादर्शनस्य समवायेनतत्रासत्वात्
ताद्दशसमुदायसत्वेपिनिश्चयप्रसंगात् अत एव स्वरूपसंबंधेनापि न विरोधित्वं धर्मिज्ञानादेस्तेनसंबं
धेनक्षतिद्व्यासत्वात् अत आह विवेचितमितिप्रामाण्यवादइतिशेष: तथाच विशेषादर्शनाभावादि
विशिष्टविरोधिकोट्युपस्थितिरेव संशयसामग्रीपदार्थस्तत्रोक्तइति ताद्दशकोट्युपस्थितित्वेनैव समवाये
ननिश्चयं प्रति विरोधित्वं वैशिष्ट्यं च तत्त्वेककालावच्छेदेन नैकात्मवृत्तित्वरूपं विशिष्टमतो नातिप्रसंग
इति भाव: ननु निश्चयत्वस्य नीलत्वानवच्छिन्नघटादेरिवाजसमाजग्रस्तत्वान्न कार्यतावच्छेदकमतस्तद्वद्धि
न्नंप्रतिसंशयसामग्र्यापिप्रतिबंधकत्वंदुर्घटमत आह वक्ष्यतेइति निश्चयत्वस्य कार्यतानवच्छेद
कत्वादिति विशिष्टबुद्धिसामान्यं प्रत्येव शक्यताभावानिश्चयत्वेन प्रतिबंधकत्वमुभयकोटिप्रविष्टवीसामग्री

प्रकारतानिरूपितंयद्विशेष्यकत्वंतदवच्छेदकत्वप्रकारता।निरूपितमपिनावच्छेदकत्वनिरूपितंविशेष्यतांतं
रामिति।तादृशसंशयस्याविरोधित्वंप्रतएववृक्षः संयोगीतदभाववांश्चेतिसमुच्चयात्वृक्षः संयोगीनवेति
संशयस्यभेदः समुच्चयेप्रकारद्वयनिरूपितैकविशेष्यत्वाभावः अतएवप्रत्यक्षमणिदीधितावतिरिक्त
विषयतापेक्षेमिथोविरुद्धधर्मद्वयप्रकारकैकविषयताप्रतियोगित्वंसंशयत्वमाहत्यतादृशत्वेनैवानुप्र
कारकताभेदविषयताभेदइतिग्रंथोसंगतःअतएवलीलावतीप्रकाशेपिविरोधिनानारूपावच्छिन्नविषय
ताप्रतियोगित्वज्ञानंसंशयंसमूहालंबनेतुविरोधिप्रकारावच्छिन्नाभिन्नैवविशेष्यतानतुविरोधिनानारू
पनिरूपितैकेतिसंशयग्रंथेस्फुटमेवाभिहितमित्यादिकमन्यत्रापिविस्तरः विषयतायाद्वयनियामकत्वम
तितत्संबंधाभावाप्रसिद्धेराहतादृग्विषयकत्वेपितादृशावच्छेदकत्वानिष्ठप्रकारतानिरूपितनिश्चयविशेष्य
त्वाभावइत्यर्थः विषयतायाः समानकालीनतयाचनातिप्रसंगः नन्वत्रापिकल्पेयस्यपुंसः स्वरूप
संबंधेनतादृशावच्छेदकत्वप्रकारकज्ञानमप्रसिद्धंतदीयव्याप्तिग्रहेव्यभिचारज्ञानाभावस्यहेतुत्वाभाव
स्तथाव्यभिचारांतरग्रहेपिव्याप्तिग्रहप्रसंगश्चेत्यतआह वस्तुतइतिइत्यादिकामित्यादिपदेनसाधनंसा

बद्देनैव कस्याचिदात्मनो बोधनिश्चये परन्परस्यात्मनः परपुरुषप्रवेशन्यायेन विशिष्टधीः प्रामाणिकी तस्यास्तु
रीरावच्छिन्नत्वं तत्पुरुषीयेत्यत्र न विवक्षणीयं विषयत्त्वेति यद्यपि घटत्वं तादृशप्रतियोगितावच्छेदकं वह्नित्वं
तु प्रमेयमित्येवं ग्रहे पि वह्नित्वं तादृशप्रतियोगितावच्छेदकत्वमित्येवं व्यापकतान्ज्ञानोत्पादात्। विषयिता
संबंधेन प्रतियोगित्वमसंगतं न च तादृशत्तावच्छेदकत्वप्रकारत्तानिरूपित्त विशेष्यतासंबंधेन तथात्वमि
ति वाच्यं वह्नित्वं तादृशप्रतियोगितानवच्छेदकत्वं न वेति संशये तत्संवह्नित्वं तादृशानवच्छेदकामिति ज्ञाना
नुपपत्तिप्रसंगात् निश्चयत्वस्य घटादिघटकस्य तत्त्वात् सामान्यतस्तादृशावच्छेदकत्वानिश्चयत्वेन प्रतिबंध
स्य वक्तुमशक्यत्वात् तथापि हेतुमन्निष्ठाभावप्रतियोगितानवच्छेदकत्वप्रकारत्तानिरूपितविशेष्यत्ता
संसर्गेण पुरुषीयतादृशानवच्छेदकत्वबुद्धिसामान्यं तत्पुरुषीयबुद्धिमात्रं प्रति एव घटपटत्वादित्तत्त्व
त्पेकधर्मधर्मिकतादृशानवच्छेदकत्वनिश्चयनिरूपितघटत्वपटत्वादि तत्पुरुषैकधर्मनिष्ठविशेष्यतासं
बंधेन हेतुमन्निष्ठाप्रतियोगितानवच्छेदकत्वज्ञानत्वेन तत्पुरुषीयज्ञानत्वमात्रे गौरवं वा प्रतिबंधकत्वं अ
तः संबंधानुगम एवं नास्ति वह्नित्वं तादृशावच्छेदकं न वेति संशयस्य तत्तद्बुद्धित्वनिष्ठमवच्छेदकत्वाभाव

ऽत्यन्तव्यभिचारज्ञानस्यावच्छेदकत्वसंबंधेनानंगशरीरत्वं ज्ञावसत्वादिति वाच्यं हस्तादेर्ज्ञानत्वावच्छेद
कत्वाभावाच्चेष्टावत्वाविशेषेपि शरीरत्वस्यैवत्तथात्वाद्न्यथा चैवो ज्ञानात्येत्यादेर्विहस्तोज्ञानात्या
देरेवपिप्रसंगात्तदुद्त्याङ्कस्तच्चिंत्यं॥ पूर्वपक्षेस्वयमस्वरसस्याह एवत्तिनानाविधव्यभिचारज्ञानाभाव
नांहेतुत्वादेवेत्यर्थः निरुक्तावच्छेदकत्वग्रहाभावमभावस्यहेतुत्वेव्यभिचारांशेत्तरग्रहदशायामपि व्या
प्तिः स्यादित्यभरुचिः एवंचेत्तिसाध्यसाधनादिभेदेनाविशिष्टैवहेतुत्वंचेत्यर्थः ननुसाध्यतसाध्याभाव
वद्वृत्तित्वेत्यादिव्यभिचारज्ञानाभावस्यतत्तन्निष्ठतयाहेतुत्वेपि साध्यत्तावच्छेदकेहेतुमन्निष्ठाभावप्रति
योगितावच्छेदकमित्याकारकेज्ञानाभावस्यधुरुषनिष्ठतयाहेतुत्वाभिधानमसंगतंवाधि॥ खंडव्यत्वादि
नंतसाध्यतावच्छेदकांतभावेनानंतकार्यकारणाभावापत्तेः किंतुहेतुमन्निष्ठाभावप्रतियोगितावच्छेदकत्व प्र
कारकत्वानंपृत्तिषमानविशेष्यत्वप्रत्यासत्यातत्पुरुषीयत्ताद्दशावच्छेदकत्वप्रकारकज्ञानस्यविशेषित्त या
विशेष्यतासंबंधेनतदभावएवतत्वहेतुरुचितः पुरुषव्यक्तीनामपिसाध्यत्तयातत्तत्पुरुषीयत्वस्यत्वयापिविषय
विषयाविषयानिवेशपत्वेनतत्प्रवेशकृतगौरवस्याप्यसंभवादाह प्रसिद्धायाइत्यादितदभावेति ताद्दशावच्छे

७२

धावदन्यवृत्तित्वादिरूपग्रहः यत्रैकविधमेव व्यभिचारज्ञानं प्रसिद्धं तत्र तावद्व्यभिचारज्ञानाभावस्य हेतुत्वासंभ
वात् सहयथायोगमिति तथा च यत्र यादृशव्यभिचारज्ञानं प्रसिद्धं तत्र तस्याभावो हेतुरिति समवायघटितसामाना
धिकरण्यप्रत्यासत्त्या हेतुत्वमावेदयितुं पुरुषनिष्ठत्वमुक्तं यद्यपि व्यभिचारज्ञानदशायामपि घटाद्यवच्छेदेन त
दभावस्य पुरुषे सत्त्वात् तदानीमपि व्याप्तिग्रहापत्तिः तथापि समवायेन व्याप्तिग्रहं प्रति समवायावच्छिन्नव्यभिचा
रज्ञानाभावस्य निरवच्छिन्नविशेषणतासंबंधेन हेतुत्वं वाच्यं व्यभिचारज्ञानकाले निरुक्ततदभावः घटाद्यवच्छे
दत्वविशिष्टविशेषणतयैव तत्रात्मनि वर्त्तत इत्यर्थः यद्व्यभिचारज्ञानविशिष्टत्वावच्छिन्नं तस्यैव समवाये
नाभावो व्याप्तिधीहेतुस्तथा चात्मनि घटाद्यवच्छेदेन व्यभिचारज्ञानस्य विरहेपि नाक्षतिः विशिष्टस्यात्मत्वस्यैव सत्त्वान्नो
क्तदोष इति तत्त्वम् वृक्षादौ मूलाद्यवच्छेदेन कपिसंयोगविशिष्टवृक्षत्वाद्यभावस्यैवात्मन्यपि घटाद्यवच्छेदे
न व्यभिचारज्ञानविशिष्टात्मत्वाद्यभावस्य सत्त्वात् विशेषणस्य तत्रासत्त्वेन तदवच्छेदेन विशिष्टस्यात्यंतासंभ
वित्वात् केचित्तु समानावच्छेदकप्रत्यासत्त्या व्यभिचारज्ञानाभावः शरीरानिष्ठ एव व्याप्तिधीहेतुः न चैवं यत्र खंडश
रीरोत्पत्तिदशायां मवास्थितहस्ताद्यवच्छेदे न व्यभिचारज्ञानं तत्रोत्तरक्षणे खंडशरीरेण व्याप्तिधीः स्यात् तदुत्पत्तौ

अन्यथा व्यापकताग्रहानंतरमपि क्वचित् सामानाधिकरण्यज्ञानोत्पत्तेः तत्राधिव्यापकत्वग्रहानंतरं हेतुरित्येव किंतु रो
चयेदिति भावः । व्यवहितेत्यपि व्यवधानियम्यत्वं क्वचित्तदुद्देश्यादि संबंधः ॥ धूमकवेति तिरस्कारात्त्वेसंभवादित्यस्य नाव्य
लब्ध्येयोग्यतासंपादकत्वाद्या वत्तद्धूमवत्ता चैकदा सन्निकर्षविरहाद्वा न संभवतीति ताद्दशावच्छेदकत्वा
भावेन त्वो किं कस्य प्रत्यक्ष इति भावः आदिपदार्थोपेक्षायाः प्रतियोगित्वव्याप्येतरयावत्तदुपलंभक
सभवधानरूपयोग्यतायाः परिग्रहः कथंचित् शब्दादिना विरोधादीति धूमत्वत्वादौ ताद्दशावच्छेदकत्व
स्याविरोधादि ग्रहवशादित्यर्थः विरोधोऽसामानाधिकरण्यं आदिपदाद्व्यापकीभूताभावप्रतियोगित्व
स्योपग्रहस्तथा च ताद्दशावच्छेदकत्वासमानाधिकरणतया ताद्दशावच्छेदकत्वव्यापकाभावप्रतियोगितया वा धू
मत्वत्वादिमत्त्वस्य धूमत्वादौ परामर्शाद्धूमत्वं ताद्दशावच्छेदकत्वाभाववदित्याकारव्यतिरेकानुमित्यनंतरमेव वा
त्ववान् ताद्दशप्रतियोगितानवच्छेदकमित्याकारप्रत्यक्षमिति भावः नन्वेवमुक्तक्रमेणावह्नित्वत्वादिहेतुना ताद्दशा
वच्छेदकत्वाभावस्य वह्नित्वेपि व्यतिरेक्यनुमितिसंभवाद्धूमत्वादिपर्यंतानुधावनं व्यर्थमिति वाच्यं प्रत्यक्षत
एव प्रथमतः साध्यतावच्छेदकीभूतवह्नित्वादौ ताद्दशावच्छेदकत्वाभावग्रहात्तदनुसरणादिति । अथाव

नकारणतावत्वं तथा व्यभिचारज्ञानविरहे तत्साधनव्यापकताग्रहत्वावच्छिन्नं प्रत्येव तस्य हेतुत्वात् ततो व्याप्ति-
विषयिताव्यापकीभूतयत्किंचिद्विषयिताकग्रहत्वावच्छिन्नं प्रतिकारणतात्वमेव तदर्थो वाच्यः सच व्याप्तेर्व्यापक-
सामानाधिकरण्यरूपत्वे सहचारज्ञानसाधारणमेव मन्यथा निर्वह्निकपर्वते वह्निव्याप्यधूमवानित्यादितः साध्यसंबंधितेति ग्राह्याभाव-
नवगाहिनोऽपि व्यभिचारज्ञानस्य प्रतिबंधकत्वादित्यादेरयेन तद्विशेषणविशिष्टहेतुनिष्ठमस्य साध्यसंबंधितानवच्छेदक-
त्वमेव वाच्यमन्यथा व्यभिचारस्येति भावः। उक्तव्याप्तिग्रहस्यानुमितिहेतुत्वात् तद्ग्राहकाभिधानमर्थान्तरग्रस्तमि-
त्यस्वरसः केचिदिदं त्वाशूचितः सामान्यतत एवेति न्यायेन च तद्व्यापकत्वग्रहं प्रति तत्सामानाधिकरण्य-
ग्रहत्वेन हेतुत्वं समानविषयत्वं च प्रत्यासत्तिस्तेनाविरुद्धो विरुद्धसाधारणोक्तव्याप्यत्वाभावाद् विरुद्धस्य
त्वे सहचारग्रहस्य हेतुत्वेपि धूमवत्त्वेनाग्नेर्व्यापकत्वग्रहे तस्य हेतुत्वे मानाभावश्चेत्यपास्तं जलत्वादेर्धूमव्या-
पकत्वग्रहानुरोधेन कृप्तस्य धूमसामानाधिकरण्यस्य ग्रहस्य वृक्षादौ धूमव्यापकताग्रहार्थमप्यावश्यक-
त्वादिति ध्येयं। असिद्धत्वादिति व्यापकत्वाभिमतसहचारभ्रमस्य हेतुतायां असिद्धेः असिद्धिमेव स्पष्टयति
विरुद्धेपीति सामग्रीक्रमाधीनो ग्रहणस्य क्रमः तद्योगपद्याधीनं च ग्रह इति योगपद्यमिति भावः नचेति

भावकूटस्य वह्नित्वमपेक्ष्य लाघवान्नित्वावच्छिन्नविशेष्यतावच्छेदकत्वप्रत्यासत्त्यैव प्रतिबंधकत्वमुचितं दं
डित्वदंडित्वाद्यवच्छिन्नविशेष्यताप्रवेशे गौरवादिति वाच्यं तत्तद्व्यासक्ति दंडसामानाधिकरण्येनावच्छेदक
त्वनिश्चयेऽपि तत्सामानाधिकरण्येनानवच्छेदकत्वानिश्चयेऽपि तत्सामानाधिकरण्येनानवच्छेदकत्वग्रह
स्यानुत्पत्तिप्रसंगात्। न च यत्र दंडादित्वं दंडत्वं च तादृशप्रतियोगितावच्छेदकमिति तन्मते तत्र दंडांशे तस्य भ्र
मत्वग्रहस्तत्र दंडत्ववद्दंडत्वेऽप्यनवच्छेदकत्वधीः स्यादिदप्रामाण्यग्रहव्यक्तेर्यभावविशिष्टस्यैव तत्स्वरूप
यावच्छेदकग्रहस्य विरोधिता यामेव दंडांशे भ्रमत्वज्ञानव्यक्तीनामनुत्तेजकत्वं यास्तं दंडत्वाद्यवच्छिन्नविशेष्य
तावच्छेदकत्वनिश्चयविशेष्यतावच्छेदकसंबंधेन विरोधिता यांतरप्रामाण्यज्ञानव्यक्तेरप्रवेशाद्यत्र य
द्धर्मावच्छिन्नविशेष्यताकत्वसंबंधेन विरोधित्वं तद्धर्मविशिष्टांशे भ्रमत्वज्ञानव्यक्तीनामनुत्तेजकत्वात् इ
त्थमेव घटादिमत्ताबुद्धिं प्रति अपि बाधबुद्धेस्तदभावव्याप्यवत्तानिश्चयस्य च समानविशेष्यतावच्छेदक
त्वप्रत्यासत्त्या विरोधित्वं परिष्कार्यमिति प्राहुः ननु व्याप्तिग्राहकमिति मूलस्य न व्याप्तिग्रहजनकत्वमात्र
मित्यर्थः पक्षादवगाहिव्याप्तिधीजनकेऽपि तादात्म्यप्रसंगात् नापि व्याप्तिग्रहत्वावच्छिन्नं प्रत्येकात्पर्यंतानिरूपि

१३

दकत्वाभावबोधेत्य पूर्तत्पूत्वकल्पनं विशिष्यतासंबंधेन तादृशावच्छेदकत्वग्रहाभावस्थले गुरुत्वकल्पनं तत्तत्प्रकु
रेतित्तत्तद्धर्मितावच्छेदकत्पर्थः विशेष्यइतिवह्नित्वादौ जातित्वादिप्रकारेणतादृशावच्छेदकत्व निर्णयेपि
वह्नित्वत्वादिप्रकारेणतादृशानवच्छेदकत्वग्रहात्तेन रूपेणतत्तद्रूपीयावच्छेदकत्वनिर्णयस्य विशे
ष्यतासंबंधेनाभावस्तेनरूपेणतत्तद्रूपीयानवच्छेदकत्वज्ञानेकारणंवाच्यं तथाचधर्मितावच्छेदकभेदेनका
र्यकारणभावानंत्यंतद्वाध्यावश्यकमिति धर्मितावच्छेदकतत्तद्रूपीयत्वस्य। निविशेनकारणत्वकल्पने
गौरवमिति भावः नव्यास्तुवह्नित्वजातिप्रकारेणवह्निर्जात्यादेः साध्यतास्थलेवह्नित्वत्वाद्यवच्छिन्नधर्मिकता
दृशावच्छेदकत्वनिश्चयत्वेनवह्नित्वाद्यवच्छिन्नधर्मिकतादृशानवच्छेदकत्वग्रहं प्रतिविरोधित्वेपिदंडित्वाद्य
वच्छिन्नसाध्यतास्थलेनिरवच्छिन्नाविशेष्यतावच्छेदकत्वसंबंधेनतत्तद्रूपीयानवच्छेदकत्वज्ञानसामान्यं प्र
त्येवदंडत्वदंडत्वादिप्रत्येकधर्मावच्छिन्नविशेष्यकावच्छेदकत्वनिश्चये विशेष्यतावच्छेदकत्वसंबंधेन
तत्तद्रूपीयावच्छेदकत्वज्ञानत्वेनतत्तद्रूपीयज्ञानत्वमात्रेणवाप्रतिबंधकत्वंयुक्तं अन्यथादंडित्वदंडित्वा
द्यनंतधर्मितावच्छेदकानंतभावेनप्रतिबध्यतावच्छेदके गौरवापत्तेः नचैवंतादृशसंबंधेनतद्वत्ताच्छिन्ना

स्याभावादित्यादिकमन्यत्र विस्तरः । साध्याभाववद्वृत्तित्वव्याप्तेर्ल्लो किंप्रत्यक्षमभ्युपगच्छतां मते अत्राह
न च धूमादावित्तिविरहादित्यादिपदात् सन्निकर्षाद्युपग्रहः नतु धूमांतरे निर्वह्निवृत्तित्वस्य संभवात् नास्त्ये
तत्कुत्तो धूमत्वावच्छेदेन तद्ग्रहणमतत्राह लाघवाद्वित्ति धूमांतरकल्पनालाघवादित्यर्थः तथा च तद्देवो
क्तसंभावनायाः प्रतिबंधकमिति भावः कालांतरे वह्न्यभाववद्वृत्तित्वेपीदानींतनेदनुपलब्धिसंभवाद
त्र मते प्रानुपपत्तेर्द्वेयोग्यज्ञानासीत्यस्वरसोऽवंचीत्युक्तास्सूचितः नत्ववह्नौ धूमकारणत्वे संशयनि
रासार्थं तत्कारणसरणाव्याप्यर्थं धूमकारणत्वस्य क्वचिद्वसंशये तत्सहचरितधर्मवत्त्वग्रहाभावादेवव
ह्नौ तत्संशयस्यासंभवात् साधारणधर्मवत्त्वग्रहस्य संशयहेतुत्वात् नचैवं धत्तेत्यादौ वह्निनैव धूम
कारणत्वनिश्चयात् तत्संभवस्तथा सति वह्नावपि तादृदेव धूमकारणत्वग्रहे बाधकाभा
वादित्यत आह सामान्यतः कारणत्वनिश्चयेन साधारणधर्मवत्ताज्ञानं संशयस्य संभवमाह हु
ताशनेत्यादिना अर्थेतेषामन्यतमो धूमकारणमित्यवधारणास्य तावदन्यतमत्वावच्छेदेन धू
मकारणत्वावगाहित्वे तादृशान्यतमत्वावत्ताज्ञानस्यैव व्यावर्तकधर्मवत्त्वाज्ञानाविषया ।

१५

पर्लंधियोग्यताया अन नुगत्ता एव न्याहाँसो। विन्मन आह अत एवेति तादृशावच्छेदकत्वाभावस्य लौकिक
प्रत्यक्षगम्यत्वाभावादेवेत्यर्थः॥ निर्णयात्मा तिसंशयादिसाधारणस्य प्रतिबंधकत्वादित्यन्वयः॥ निश्च
यत्वावच्छिन्नं प्रति एव विपरीततानस्य विपरीतबोधित्वे विपरीतनिश्चयोत्तरं मे शायापत्तिरत आह स्मा
धारणेत्विति निश्चयात्मनदूत्पाग्रिमेणान्वयः॥ शंखो न पीत इत्यादि निश्चयसत्वेपि दृष्टनयनस्य पु
सः शंखः इत्यनुपनीतभानोत्पत्तेराह दोषविशेषाजन्येति सत्यपि बाधानिर्णये लौकिकप्रत्यक्ष सं
भवादाह उपनीतेति अत्रोपनीतत्वं साक्षात्कारत्वानि रूपितविषयिताकं तत्र दोषविशेषाध
जन्यत्वाप्रवेशः॥ गौरवात् साक्षात्कारकत्वानिरूपिततत्तत्प्रकारताकबुद्धिं प्रत्येव लाघवेन तदभा
वनिश्चयत्वेन प्रतिबंधकत्वात् साक्षात्कारत्वानिरूपितं च तत्प्रकारत्वं तत्तल्लौकिकप्रत्यक्षइव दोषविशेषज
न्य प्रत्यक्षेप्यविशिष्टं उक्तयत्रैव साक्षात्करोमीत्यनुभवादेकदेशे घर्म्यंकत्वमशक्यत्वात् अत एव लौकिकस
न्निकर्षजन्यस्यापि घटादिसंशयस्य तदभावनिश्चयप्रतिबध्यत्वं संशयघटकप्रकारकतया आपिसाक्षा
त्कारत्व निरूपितत्वात् घटं संदेहीत्यादिवत् सघटं साक्षात्करोमीत्याकारस्य संशयानुव्यवसाय

चे

यव्यतिरेकज्ञानस्य हेतुत्वात् तद्ग्राहकं किं वा दित्यत आह यस्य चेतित यथा चान्वयव्यतिरेकज्ञानमप्यस्तीति भावः त
र्कश्चेति भूमप्रकारणात्वनिश्चयेत्यर्थः निश्चयात्मकप्रत्यक्षे आहार्यसंशयस्य प्रतिबन्धकत्वमाहत्येदं । ननु व्य
भिचारशंकाभिरासस्तर्को दर्शनीयः सच धूमो यदि वह्निव्यभिचारी स्यात्तर्हि वह्निजन्यो न स्यादित्याकारक
वान्तिवह्निजन्यत्वग्राहकस्य तर्कस्य प्रदर्शनानौचित्यमत आहाव संदेह इति अपेक्षणीयेत्यर्थः कार्यका
रणभावग्रह इत्यस्य वह्निधूमयोरित्यादिः कार्यकारणभाव इति पाठे तु अत्र संदेह इत्यस्य निश्चितव्यापत्य
यः तदधीनत्वात् कार्यकारणभावग्रहाधीनत्वात् अन्यथा धूमवह्निजन्यत्वानिर्णये बाधग्रहाभावादु त
र्क एव नावतरेत्तर्को व्यभिचारशंकानिरासद्वारा व्याप्तिग्राहकः स्यात् त थाच बाधनिर्णयविधया व्य
भिचारशंकानिवर्तकतर्कमूलस्य वह्निजन्यस्य निर्णयस्य संपादकत्तयेवक्ष्यमो यदि समवह्नितोजन्यत्वे स
[illegible]दे मूलीकृत तर्को व्याप्तिग्रहे उपयुज्यत इति भावः प्राचां मते स्वत्वस्यानुगतत्वादालोकादि साधारण
मन्यथासिद्धं विरुद्धकस्य व्यापकतावच्छेदकीभूतवह्नित्वादिधर्मिकत्वमेवव्यक्त्यादिकारणत्वं तत्था च
धूमालोकतादृशव्यभावच्छिन्नसामानाधिकरणप्रभानस्यसामग्रीसत्त्वदशायां बह्नौ धूमकारणत्वग्रहण

७६

ष्याभावात् असाधारणधर्मवत्त्वग्रहस्य संशयहेतुत्वात् नन्वेवं वनोदे विनैव धूमकारणत्वनिश्चयात् तत्संभव
स्तथासति इव ज्ञानेपि तत्तदेव धूमकारणत्वग्रहे बाधकाभावादित्यतः सामान्यतः कारणत्वनिश्चयेन सा
धारणधर्मवत्ताज्ञानं च वह्नौ धूमकारणत्वसंदेहविरोधित्वसंभवात् तर्कानुसरणं विफलमत आह संदिग्ध
इति संदेहाकारमाह एतानीति कृताशनाद्यन्यतमत्वेन धूमकारणत्वं कृताशनत्वावच्छिन्नं किमन्यतमावच्छेद्यं
न वेति संदेहे तात्पर्यमिति यावत् उक्तसंदेहानुरोधादन्यतमत्वसामानाधिकरण्येनैव धूमकारणत्वं पूर्वमव
धृतमन्यथा प्रतिबंधकसत्वे तादृशसंदेहायोगादिति भावः नन्वेतावता साभानाकारणत्वनिश्चयेन कार
णत्वसहचरितधर्मवत्ताज्ञानस्य संपादनेपि धूमकारणत्वाभावरूपपरकोटिनिश्चयस्याकृतत्वात् स
गत्वात् तन्नाहितधर्मवत्ताज्ञानादिव हास्य व धूमकारणत्वसंदेहासंभवात् नानिरासस्तर्को विफल एवेत्य
तो धूमकारणत्वाभावनिर्णयस्य प्रकारमाह तत्र चेति ग्रहे बलमेवेति तथा च तत्तमंतभावे कारणत्वाभाव
सहचरितधर्मवत्त्वग्रहो नानुपपन्न इति भावः ननु कर्कमेणकारणत्वसंदेहस्य सामग्रीसंपादकत
र्कस्य नान्तिवर्त्तकत्वोपपादनेपि कारणतानिश्चायकत्वं तर्कस्य दुर्घटं प्रत्यक्षेणकारणत्वग्रहेऽन्व

पर्य्ययि यत्कोटिर्भासते तदभावशंकायामेव तर्कस्य प्रतिबंधकत्वमित्यर्थः वह्नित्वावच्छिन्नेपीति न चोक्तान्यतरत्वा
वच्छिन्नाभावस्याप्रसिद्धिः जन्यमात्रस्यैव वह्निशून्यात्हदादिजन्यत्वेन जन्यत्वस्यैव लाघवेन तत्त्वादृशाभाव
प्रतियोगितावच्छेदकत्वादिति वाच्यं प्रतीतिबलादुरुत्वधर्मस्यापि प्रतियोगितावच्छेदकत्वस्वीकारात् तथात्वापत्तिरिति
वह्निजन्यत्वशंकानिवर्त्तकत्वापत्तेरित्यर्थः न चान्यविपर्ययान्यतरत्वस्यैव पर्य्यवसानं ननु वह्नि
जन्यत्वस्येति कथं तदभावशंकानिवर्त्तकत्वप्रसक्तिस्तत्तर्कस्येति वाच्यं पटपटाद्यन्यतरत्वस्य घटत्वपट
त्वादिस्वरूपत्वात् वह्नितच्छून्यजन्यान्यतरत्वस्यापि वह्निजन्यत्वस्वरूपतया वह्निजन्यत्वेपि विपर्ययस्य
पर्य्यवसानसंभवादिति भावः तथापर्य्यवसायितेति विपर्य्यये तन्मात्रकोटिपर्य्यवसायिताचेत्यर्थः वि
शेषतो व्याप्त्यादियद्धर्मावच्छिन्नाभावशंकायां तर्कस्य विरोधित्वं तदापाद्याभावे तद्धर्मावच्छिन्नव्यापकत्वा
देव क्वचिद्विपर्य्यये तन्मात्रकोटिपर्य्यवसानं यथा पर्वतो निर्वह्निः स्यात्तर्हि निर्धूमः स्यादित्यादौ न तत्तदा
पाद्यस्य निर्धूमस्याभाववह्नित्वावच्छिन्नस्य व्याप्तिग्रहादेव विपर्य्यये वह्निमात्रपर्य्यवसायित्व
मिति भावः सामान्यतोपीति यद्धर्मावच्छिन्नाभावशंकायां तर्कस्य विरोधित्वं आपाद्याभावे तादृशरूपधर्मव

७७

वह्निधूमयोः व्याप्तिग्रहस्वरूपं स्वव्यापकसामानाधिकरण्यावगाहिज्ञानं गाहित्वादिति मूलोक्ततर्कस्य तादृ
शकारणताग्राहकत्वाशेषत्वेनैव व्याप्तिग्राहकत्वं संभवतीत्याशयेनाह सामानाधिकरण्येनेत्यादि
प्रकारेतृतीया तथ्येवसामानाधिकरण्येनैव तत्सेवेति कारणता थहस्येवेत्यर्थः वृक्षकारणेनास्यायां
व्यवहितप्राक्कालावच्छिन्नस्वाधिकरणवृत्तिकाभावप्रतियोगित्वानवच्छेदकधर्मवत्त्वरूपायाएवव्याप
कत्तयोः कारणताशरीरनिविष्टत्वया तदवच्छिन्नसामानाधिकरण्यस्य परिच्छेदे पित्वसमानाधिकर
णाभावप्रतियोगितानवच्छेदकधर्मावच्छिन्नसामानाधिकरण्यरूपाया अर्थमित्युपयुक्तव्याप्यत्वः का
रणताग्रहेणाविषयीकरणादित्यियं नतु तद्धर्मावच्छिन्नापादकत्वापत्तित्वेनैव तद्धर्मावच्छिन्नत्ववत्ता
बुद्धिप्रतिविरोधित्वात् विशिष्टापादकस्य मूलोक्ततर्कस्य कृतेवाङ्किजन्यत्वशंकानिवर्त्तकत्वमत आ
ह विपर्ययमेतन्मात्रपदस्य प्रयोजनमाहान्यथेति विपर्ययेयत्कोटिर्भासतेतदभावशंकास्वविशे
षापादकाभाववत्त्वान्नमातेतन्मात्रविषयकत्वाकस्यैवेत्यर्थः तथाच यद्धर्मावच्छिन्नापादकापत्तित्व
मावं नतद्धर्मावच्छिन्नवत्ताबुद्धिविरोधित्वायां तंत्रमिति भावः मात्रपदस्य प्रयोजनमाहान्यथेति वि

संबंधेनावच्छिन्नप्रतियोगितानिरूपकाभाववत् [illegible] संयोगवत्त्वादित्यत्र साध्यतायां [illegible]
[illegible] प्रतियोगितावच्छेदकतादात्म्यसंबंधेन प्रतियोग्यनधिकरणत्वं [illegible] संबंधेन [illegible] तादात्म्येन [illegible]
[illegible] संबंधेन साध्यतायां प्रतियोग्यनधिकरणत्वं [illegible] संयोग [illegible]

नचैवं प्रतियोग्यनधिकरणहेतुमन्निष्ठाभाववत्यग्रिमनिष्कर्षस्य प्रतीकारः प्रतियोगितावच्छेदकसंबंधेन प्रतियोगि
संबंधितत्वस्याक्तित्वावच्छिन्नभेदकूटवद्वृत्तित्वस्यैव तत्र वक्तव्यत्वात् वक्तत्वस्य तादात्म्यसंबंधेनापि नकस्यचित्प्र
गुरुत्वात्प्रवृत्तित्वमतो यथाश्रुतमेव सम्यक् । केचित्तु प्रतियोग्यनधिकरणहेतुमन्निष्ठाभावप्रतियोगितायां य
द्धर्मावच्छिन्नयत्संबंधावच्छिन्नत्वोभयाभाववद्वृत्त्याद्विवक्षमाणा निष्कर्षस्य तादात्म्येन साध्यतायां व्यभिचारिण्यतिव्या
प्तिरतः प्रतियोग्यनधिकरणत्वं परित्यज्य प्रतियोग्यसंबंधित्वमेव ग्राह्यं तत्रापि निवेश्यमित्याशयेन संबंधित्वमित्याहुः
ननु कपिसंयोगाभावस्यापि गुणादौ प्रतियोग्यसमानाधिकरणत्वात् कपिसंयोगित्वादित्यादावव्याप्तिरत आ
ह तद्विशिष्टस्येति प्रतियोगिसामानाधिकरण्याभावविशिष्टस्येत्यर्थः । तथा च हेतुमति वृक्षादौ संयोगवद्वृत्तित्वाभाव
विशिष्टः संयोगो नास्तीति नाव्याप्तिः निरूपितावधेयत्वमप्यतिरिक्तं इत्याशयेनेदं यद्वा तद्विशिष्टेत्यस्य हेत्वधिकरण
न्यस्त त्वप्यर्थः अधिकरणत्वं तथा च विशिष्टस्याधिकरणं न वृत्तित्वमभावे वाच्यमित्यर्थः ; यद्यपि प्रतियोग्यसमाना
धिकरणत्वं हेतुविशेषणीकृत्य प्रतियोग्यसमानाधिकरण्यविशिष्टो यो हेतुस्तदनधिकरणवृत्त्यभावस्य प्रतियोगि
तावच्छेदकस्य व्यापकतया संयोगिसत्त्वादित्यादौ नातिव्याप्तिः सम्भवना वृक्षश्च प्रतियोगिवैयधिकरण्यवृत्तिच्छिन्न
हेत्वधिकरणत्वाभावात् तत्र घटादिकमादाय च संयोगाभावः प्रतियोग्यसमानाधिकरणः प्रत्यग्रिममूलस्वरसेन हेतुस

व्याप्ति

मानाधिकरणाभावस्यैव विशेषणे अत एतावान् प्रयास इत्यवधेयं। ननु भेदस्य व्याप्यवृत्तितया प्रतियोगिसमाना
धिकरणाभिन्नत्वस्यैव प्रागुक्ताव्याप्तिवारणासंभवे तर्हि शिष्टस्येत्यादिकं विफलमत आह प्रतियोगिमद्वृत्तिभिन्नत्व
मित्यर्थः अत्रेति अस्वरसादित्यन्वयः तदभावत्वमिति तथा च संयोगित्वादित्यादावतिव्याप्तिरिति भावः ननु सं
योगाभावे गुणे न संयोगसमानाधिकरणमिति प्रतीतिबलादेव गुणावच्छेदेन संयोगाभावे प्रतियोगिसामानाधिक
रण्यासत्त्वान्नाव्याप्तिरत आह प्रतीतेरिति उक्तप्रतीतेः संयोगाभावनिष्ठस्य संयोगसामानाधिकरण्यावच्छेदकत्वा
भावमेव गुणेवगाहत इति भावः वक्ष्यति मूलकारः तच्च तदपि हेत्वधिकरणवृत्ति तेन कपिसंयोगाभावस्य प्र
तियोगिवैयधिकरण्यावच्छेदकीभूतगुणत्वावच्छिन्नत्वेपि कपिसंयोगित्वादित्यादौ नाव्याप्तिरिति भावः ननु हेत्वधि
करणप्रतियोगिवैयधिकरण्यावच्छेदकावच्छिन्नत्वं प्रतियोगिसामानाधिकरण्यावच्छेदकीभूतहेत्वधिकरणवृत्तित्वं त
च्च व्याप्यवृत्तेरवच्छेदकविरहादप्रसिद्धं गुरुतरं चेत्यत आह प्रतियोग्यनधिकरणेति कस्यचिदिति अधिकरणमितिप
रेणान्वयः तत्तद्व्यक्त्यन्तरे प्रतियोगिवैयधिकरण्यावच्छेदकावच्छिन्नत्वं व्यक्त्यन्तरेत्यर्थः। स्वमते संयोगसामान्याभाव
स्य केवलान्वयित्वात्तत्साध्यकसत्त्वादिकं सद्धेतुरेवात साध्यान्तरमाह द्रव्यत्वाभावेति यद्यपि द्रव्यत्वाभावस्य व्याप्यवृ
त्तित्वात्तत्साध्यप्रतियोगिवैयधिकरण्यप्रवेशादिदं मन्मते संयोगसामान्याभावस्य केवलान्वयित्वात्तत्साध्यक

१

[OrderDescription]
,CREATED=30.09.19 16:27
,TRANSFERRED=2019/09/30 at 16:50:44
,PAGES=103
,TYPE=STD
,NAME=S0001921
,Book Name=M-2272-SHARIRAK BHASYA
,ORDER_TEXT=
,[PAGELIST]
,FILE1=00000001.TIF
,FILE2=00000002.TIF
,FILE3=00000003.TIF
,FILE4=00000004.TIF
,FILE5=00000005.TIF
,FILE6=00000006.TIF
,FILE7=00000007.TIF
,FILE8=00000008.TIF
,FILE9=00000009.TIF
,FILE10=00000010.TIF

FILE11=00000011.TIF
,FILE12=00000012.TIF
,FILE13=00000013.TIF
,FILE14=00000014.TIF
,FILE15=00000015.TIF
,FILE16=00000016.TIF
,FILE17=00000017.TIF
,FILE18=00000018.TIF
,FILE19=00000019.TIF
,FILE20=00000020.TIF
,FILE21=00000021.TIF
,FILE22=00000022.TIF
,FILE23=00000023.TIF
,FILE24=00000024.TIF
,FILE25=00000025.TIF
,FILE26=00000026.TIF
,FILE27=00000027.TIF
,FILE28=00000028.TIF
,FILE29=00000029.TIF

FILE30=00000030.TIF
,FILE31=00000031.TIF
,FILE32=00000032.TIF
,FILE33=00000033.TIF
,FILE34=00000034.TIF
,FILE35=00000035.TIF
,FILE36=00000036.TIF
,FILE37=00000037.TIF
,FILE38=00000038.TIF
,FILE39=00000039.TIF
,FILE40=00000040.TIF
,FILE41=00000041.TIF
,FILE42=00000042.TIF
,FILE43=00000043.TIF
,FILE44=00000044.TIF
,FILE45=00000045.TIF
,FILE46=00000046.TIF
,FILE47=00000047.TIF
,FILE48=00000048.TIF

FILE49=00000049.TIF
,FILE50=00000050.TIF
,FILE51=00000051.TIF
,FILE52=00000052.TIF
,FILE53=00000053.TIF
,FILE54=00000054.TIF
,FILE55=00000055.TIF
,FILE56=00000056.TIF
,FILE57=00000057.TIF
,FILE58=00000058.TIF
,FILE59=00000059.TIF
,FILE60=00000060.TIF
,FILE61=00000061.TIF
,FILE62=00000062.TIF
,FILE63=00000063.TIF
,FILE64=00000064.TIF
,FILE65=00000065.TIF
,FILE66=00000066.TIF
,FILE67=00000067.TIF

FILE68=00000068.TIF
,FILE69=00000069.TIF
,FILE70=00000070.TIF
,FILE71=00000071.TIF
,FILE72=00000072.TIF
,FILE73=00000073.TIF
,FILE74=00000074.TIF
,FILE75=00000075.TIF
,FILE76=00000076.TIF
,FILE77=00000077.TIF
,FILE78=00000078.TIF
,FILE79=00000079.TIF
,FILE80=00000080.TIF
,FILE81=00000081.TIF
,FILE82=00000082.TIF
,FILE83=00000083.TIF
,FILE84=00000084.TIF
,FILE85=00000085.TIF
,FILE86=00000086.TIF

FILE87=00000087.TIF
,FILE88=00000088.TIF
,FILE89=00000089.TIF
,FILE90=00000090.TIF
,FILE91=00000091.TIF
,FILE92=00000092.TIF
,FILE93=00000093.TIF
,FILE94=00000094.TIF
,FILE95=00000095.TIF
,FILE96=00000096.TIF
,FILE97=00000097.TIF
,FILE98=00000098.TIF
,FILE99=00000099.TIF
,FILE100=00000100.TIF
,FILE101=00000101.TIF
,FILE102=00000102.TIF
,FILE103=00000103.TIF
,